चतुर्दशारं चैतानि शक्तिचक्राणि पञ्च च ॥
बिन्दुश्चाष्टदलं पद्मं पद्मं षोडशपत्रकम् ।
चतुरश्रं च चत्वारि शिवचक्राण्यनुक्रमात् ॥
त्रिकोणे बैन्दवं श्लिष्टमष्टारेऽष्टदलाम्बुजम् ।
दशारयोः षोडशारं भूगृहं भुवनाश्रके ॥ ५८५

---

१. शि० वि०, पृ० २३
२. सौ० ल० लक्ष्मी०, पृ० ७१–७२

शैवानामपि शाक्तानां चक्राणां च परस्परम् ।
अविनाभावसंबन्धं यो जानाति स चक्रवित् ॥
त्रिकोणमष्टकोणं च दशकोणद्वयं तथा ।
मनुकोणं चतुष्कोणं कोणचक्राणि षट् क्रमात् ॥
मूलाधारं तथा स्वाधिष्ठानं च मणिपूरकम् । ५९०
अनाहतं विशुद्ध्याख्यमाज्ञाचक्रं विदुर्बुधाः ॥
तवाधारस्वरूपाणि कोणचक्राणि पार्वति ।
त्रिकोणरूपिणी शक्तिर्बिन्दुरूपः शिवः स्मृतः ॥
अविनाभावसंबन्धस्तस्माद् बिन्दुत्रिकोणयोः ।

(२)

[1]मन्वश्रद्विदशाराष्टकोणवृत्तचतुष्टयम् । ५९५
अष्टाविंशतिमर्माणि चतुर्विंशतिसंधयः ॥

(३)

[2]साधु साधु महाभागे पृष्टं त्रैलोक्यसुन्दरि ।
गुह्याद् गुह्यतमं ज्ञानं न कुत्रापि प्रकाशितम् ॥
कलाविद्या पराशक्तेः श्रीचक्राकाररूपिणी ।
तन्मध्ये बैन्दवस्थानं तत्रास्ते परमेश्वरी ॥ ६००
सदाशिवेन संपृक्ता सर्वतत्त्वातिगा सती ।
चक्रं त्रिपुरसुन्दर्याः ब्रह्माण्डाकारमीश्वरी ॥
पञ्चभूतात्मकं चैव तन्मात्रात्मकमेव च ।
इन्द्रियात्मकमेवं च मनस्तत्त्वात्मकं तथा ॥
मायादितत्त्वरूपं च तत्त्वातीतं च बैन्दवम् । ६०५
बैन्दवे जगदुत्पत्तिस्थितिसंहारकारिणी ॥
सदाशिवेन संपृक्ता तत्त्वातीता महेश्वरी ।
ज्योतीरूपा पराकारा यस्या देहोद्भवाः शिवे ॥

---

१. सौ० ल० लक्ष्मी०, पृ० ८२

२. सौ० ल० लक्ष्मी०, पृ० १००-१०१

किरणाश्च सहस्रं च द्विसहस्रं च लक्षकम् ।
कोटिरर्बुदमेतेषां परा संख्या न विद्यते ॥ ६१०
तामेवानुप्रविश्यैव भाति लोकं चराचरम् ।
यस्या देव्या महेशानि भासा सर्वं विभासते ॥
तद्भासा रहितं किञ्चिन्न च यच्च प्रकाशते ।
तस्याश्च शिवशक्तेश्च चिद्रूपायाश्चितं विना ॥
आन्ध्यमापद्यते नूनं जगदेतच्चराचरम् । ६१५
तेषामनन्तकोटीनां मयूखानां महेश्वरी ॥
मध्ये षष्ट्युत्तरं तेऽमी त्रिशतं किरणाः शिवे ।
ब्रह्माण्डं व्यश्नुवानास्ते सोमसूर्यानलात्मना ॥
अग्नेरष्टोत्तरशतं षोडशोत्तरकं रवेः ।
षट्त्रिंशदुत्तरशतं चन्द्रस्य किरणाः शिवे ॥ ६२०
ब्रह्माण्डं भासयन्तस्ते पिण्डाण्डमपि शाङ्करि ।
दिवा सूर्यस्तथा रात्रौ सोमो वह्निश्च संध्ययोः ॥
प्रकाशयन्तः कालांस्ते तस्मात् कालात्मकास्त्रयः ।
षष्ट्युत्तरं च त्रिशतं दिनान्येव च हायनम् ॥
हायनात्मा महादेवः प्रजापतिरिति श्रुतिः । ६२५
प्रजापतिर्लोककर्ता मरीचिप्रमुखान् मुनीन् ॥
सृजत्येते लोकपालान् ते सर्वे लोकरक्षकाः ।
संहारश्च हरायत्त उत्पत्तिर्भवनिर्मिता ॥
रक्षा तु मृडसंलग्ना सृष्टिस्थितिलये शिवः ।
नियुक्तः परमेशान्या जगदेव प्रवर्तते ॥ ६३०

(४)

[1]सूर्यमण्डलमध्यस्थां देवीं त्रिपुरसुन्दरीम् ।
पाशाङ्कुशधनुर्बाणान् धारयन्तीं प्रपूजयेत् ॥

---

१. सौ० ल० लक्ष्मी०, पृ० १२८

(५)

[1]चन्द्रज्ञानविद्यायां षोडशनित्याप्रतिपादनम् । नित्याप्रतिपादकत्वेऽपि कापालिकमतान्तःपातित्वाद् हेयमेव । उपादेयचन्द्रज्ञानविद्या चतुष्षष्टितन्त्रातीता । ६३५

—:०:—

चरणसूत्रम्

[2]विद्येति मातृकापीठं तत् पार्थिवमुदाहृतम् ।
मण्डलं कुण्डलीपीठं तदाप्यं परिकीर्तितम् ॥
मन्त्रसंज्ञं क्रियापीठं तैजसं तत् प्रकीर्तितम् ।
ज्ञानपीठं तु मुद्राख्यं तद् वायव्यं सुरेश्वरि ॥
परेच्छामुखतो व्योम पीठत्वेनेह नादृतम् । ६४०
तन्मूलस्योपचारस्य बाह्यस्याभावतः प्रिये ॥
चेष्टात्मको भवेद् वायुस्ततः स्यान्नतिरध्वरे ।
दीपः स्यात् तैजसस्तोयं चरुरिष्टो रसात्मकः ॥
पृथिव्या गन्धवत् पुष्पमुपचाराय पाद (ये ? योः) ।

—:०:—

चिच्छक्तिसंस्तुतिः

[3]तदेवं त्वत्प्रवृत्त्या त्वन्निवृत्त्या चोदयेतरे । ६४५
जुषन्ते येन तत्त्वानि तान्यतः स्पन्द एव ते ॥
(वैसादृश्येऽपि कार्यस्यास्यात्र दृष्टान्तमाह यत्) ।
ज्वलनाद् धूमोद्गतिरिव विविधाकृतिरम्बरे गता भाति ।
तद्वद् विष्णोः सृष्टिः स्वभावजा द्वैतरूपेयम् ॥

---

१. सौ० ल० लक्ष्मी०, पृ० १३८

२. म० म० प०, पृ० ९

३. स्प० प्र०, पृ० ६

प्राश्यानश्चिद्रसस्यौघः साकारत्वमुपागतः । ६५०
अवश्यायः प्रबोधार्के तूदिते स्वस्वभावभाक् ॥

जयरथगुरुः

(१)

[1]शश्वद्विश्वमनश्वरप्रकृतयो विश्वस्तचित्ता भृशं
ये विज्ञानतनूनपाति विततोन्मेषा वषट्कुर्वते ।
तेषां संततसर्वमेययजनक्रीडामहायज्वनां
नो मन्येऽवभृथक्षणः क्षणमपि क्षीणस्थितिर्लक्ष्यते ॥ ६५५

(२)

[2]सर्वभावमयभावमण्डलं
विश्वशक्तिमयशक्तिबर्हिषि ।
जुह्वतो मम समोऽस्ति कोऽपरो
विश्वमेधमययज्ञयाजिनः ॥

जयरथपरमगुरवः

[3]यो यस्य गुर्वादेशः स तस्य मोचकः । ६६०

---

१. त० आ० वि० ४ । २०२; पृ० २३३
२. त० आ० वि० ५ । ६६; पृ० ३७१
३. त० आ० वि० ४ । १७३; पृ० २०३

जयाख्यसंहिता

(१)

[1]निष्कम्पबोधसामान्यरूपो मात्रा पुरा स्वयम् ।
ये शब्दजनिता भावाः सूक्ष्मसूक्ष्मतराखिलाः ॥
सामान्यबोधशब्दस्य पश्यतस्त्वेकतां गताः ।
यदाऽभिमुखमायान्ति संकल्पाद्युत्थितस्य च ॥
शब्दरूपपदार्थस्य शब्दः स परमः स्मृतः । ६६५
संकल्पपदवीरूढः स्फुरत्यन्तःस्थितः स्फुटम् ॥
पदार्थोपरमः शब्दो मध्यमं विद्धि तं मुने ।
चिद्वायुकरणोत्थासु प्रयत्नपदवीषु च ॥
वाच्यवाचकभावेनाभिव्यक्तः स्थूल उच्यते ।
दृश्यादृश्येषु भावेषु योऽभिव्यक्तिं प्रयाति च ॥ ६७०
स तु स्थूलतरश्चैव व्यवहारेऽखिले स्थितः ।

(२)

[2]तत्त्वनिर्मुक्तदेहस्य केवलस्य चिदात्मनः ।
य उदेति महानन्दः सा शक्तिर्वैष्णवी परा ॥

(३)

[3]एकस्य मन्त्रनाथस्याप्यन्तर्बाह्योदितस्य च ।
यदैक्यं तं जपं विद्धि लक्षसंख्याधिकं मुने ॥ ६७५

(४)

[4]यस्माद् देवो जगन्नाथः कृत्वा मन्त्रमयीं तनुम् ।
मग्नानुद्धरते लोकान् कारुण्याच्छास्त्रपाणिना ॥

---

१. स्प० प्र०, पृ० ९
२. स्प० प्र०, पृ० ११
३. स्प० प्र०, पृ० ३४
४. स्प० प्र०, पृ० ५४

जाबालिसूत्राणि

(१)

[1]द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धाऽपरिलुप्तचैतन्य-स्वभावो जगदुत्पत्तिस्थितिलयैकहेतुर्भगवान् वासुदेव आत्मेति ॥

ज्ञानगर्भस्तोत्रम्

[2]अनच्ककृतायतिप्रसृतपार्श्वनाडीद्वय- ६८०
च्छिदो विधृतचेतसो हृदयपङ्कजस्योदरे ।
उदेति तव दारितान्धतमसः स विद्याङ्कुरो
य एष परमेशतां जनयितुं पशोरप्यलम् ॥

(२)

[3]विहाय सकलाः क्रिया जननि मानसीः सर्वतो
विमुक्तकरणक्रियानुसृतिपारतन्त्र्योज्ज्वलम् । ६८५
स्थितैस्त्वदनुभावतः सपदि वेद्यते सा परा
दशा नृभिरतन्द्रितासमसुखामृतस्यन्दिनी ॥

(३)

[4]मयि स्थितमिदं जगत् सकलमेव सर्वत्र वा
स्थितोऽहमिति धारणाद्वितयभावनावेशतः ।
जगत्त्रितयनाथ तानतिचिरेण सम्प्राप्यते ६९०
नृभिस्तव सपर्यया दलितकिल्बिषोपप्लवैः ॥

---

१. स्प० प्र०, पृ० ३९

२. प्र० हृ०, सू० १८

३. शि० वि०, पृ० १०५–१०६; प्र० हृ०, सू० १८

४. स्प० प्र०, पृ० ४१

ज्ञानतिलकः

(१)

[1]न दानैर्न तपोयज्ञैर्नियमैर्न व्रतैः शुभैः ।
न स्नानतीर्थसंघातैर्लभ्यते परमं पदम् ॥
नानेकैः तपसां व्रातैर्लभ्यते पुण्यसञ्चयैः ।
बध्नन्ति सर्वथात्मानं कोशकारं कृमिर्यथा ॥ ६९५

ज्ञानदीपविमर्शिनी

[2]ओड्याणपीठमध्ये कदम्बवनान्तरश्रीमञ्चचतुष्पादके लं पृथिव्यधिपतये ब्रह्मणे नमः, वं अपामधिपतये विष्णवे नमः, रं तेजोधिपतये रुद्राय नमः, यं वाय्वधिपतये ईश्वरायः नमः । एतानभ्यर्च्य हं आकाशाधिपतये पञ्चवक्त्रसदाशिवमहाप्रेतासनाय नमः । ७००

ज्ञानसंबोधः

(१)

[3]स्वभावादेकरूपापि नानात्वं प्रतिपद्यते ।
ज्ञानस्य शक्तिः सङ्कल्पैर्लक्ष्मीश्चिन्तामणेरिव ॥

(२)

[4]विश्वस्याश्रय आकाशं न विश्वं नभसो भवेत् ।
ज्ञानं नभ इवानन्तं ज्ञेयं विश्ववदल्पकम् ॥

---

१. श० र० सं०, पृ० ७०
२. यो० दी०, पृ० १६०
३. स्प० प्र०, पृ० ४
४. स्प० प्र०, पृ० १३

आकाशस्येव वाऽन्येन प्रतिबन्धो न केनचित् । ७०५
व्यापित्वात् तद्वदस्यापि ज्ञानस्याऽप्रतिबन्धता ॥

(३)

[1]यद्यपि स्वात्मशक्त्यैव गतिः साक्ष्यन्ययोर्द्वयोः ।
तथाप्येकः स्वयं याति द्वितीयोऽन्येन नीयते ॥
साक्षिवत् स्फीतबोधानां स्वातन्त्र्यं विषमेष्वपि ।
अन्धवन्मन्दबुद्धीनां पारतन्त्र्यं समेष्वपि ॥ ७१०

(४)

[2]ज्ञाता ज्ञेयं ज्ञानमिति ज्ञानस्यैव त्रिधा स्थितिः ।
ब्रह्मार्पणं ब्रह्महविरित्यत्रोक्तं तदेव यत् ॥

(५)

[3]सर्वः स एव व्यापित्वाद् ज्ञः स एव स्वभावतः ।
सर्वज्ञश्चेति सर्वज्ञः पुमानिव निरुद्ध्यते ॥

ज्ञानामृतरसायनम्

[4]मात्रार्धमात्रात् परमं तदर्धाच्च परं परम् । ७१५
तत्त्वातीतं परं तत्त्वमभावं भावमाश्रितम् ॥

(तथा)—

अत्र प्रकाशमात्रं यत्स्थिते धामत्रये सति ।
उक्तं बिन्दुतया शास्त्रे शिवबिन्दुरिति स्मृतः ॥

---

१. स्प० प्र०, पृ० २९
२. स्प० प्र०, पृ० ३९
३. स्प० प्र०, पृ० ४५
४. वि० भै० वि०, श्लो० ९१

अनुत्तरं परं धाम तदेवाकुलमुच्यते ।
विसर्गस्तस्य नाथस्य कौलिकी शक्तिरुच्यते ॥ ७२०

ज्ञानेन्दुकौमुदी

(१)

[1]यद्यथोपनतमेव पूर्णता-
मादधाति हृदयङ्गमत्वतः ।
तत् तथैव परमेश पूजने
योग्यमन्यदिह नास्ति लक्षणम् ॥

(२)

[2]स्वात्मानं हि विहाय चेतनममुं किं पूजयेयुर्जडम् । ७२५

तत्त्वगर्भस्तोत्रम्

(१)

[3]यदा तु तेऽपि सुव्यक्तस्वसामर्थ्यगुणोज्ज्वलाः ।
भवेद् दृढतरादूरदारिता दार्ढ्यदीनता ।
तदा च तेषां सङ्कल्पः कल्पपादपतां व्रजेत् ॥

(२)

[4]परमार्थेन न ग्राह्यं ग्राहकं वा न किञ्चन ।
यस्माद्दृते तत् स्वाभासमस्वाभासमिवेक्ष्यते ॥ ७३०

---

१. म० म० प०, पृ० १२०
२. म० म० प०, पृ० १२१–१२२
३. शि० वि०, पृ० १२६
४. स्प० प्र०, पृ० १७

तत्त्वयुक्तिः

(१)

[1]येन येन हि बद्ध्यन्ते जन्तवो रौद्रकर्मणा ।
सोपायो न तु तेनैव मुच्यन्ते भवबन्धनात् ॥

(२)

[2]विषयाधिपतिर्यो हि येन जानाति पार्वति ।
तस्य यो वेत्ति तत्त्वेन तेन ज्ञातं चराचरम् ॥

तत्त्वरक्षाविधानम्

[3]अशक्तत्वान्निष्क्रियत्वान्न पुंसि न परे पदे । ७३५
शक्तौ नियोजयेन्मन्त्रं जपस्तु सफलो भवेत् ॥

तत्त्वविचारः

[4]स्वस्वभावस्थिता भावाः सम्बध्यन्ते परस्परम् ।
भोग्यभोक्तृत्वभावेन न कदाचित् स्वभावतः ॥
द्रष्टाऽनुभविता स्मर्ता ग्राहको भोक्तृवेदकः ।
कर्तोपलब्धा संवेत्ता ज्ञातेति ज्ञानसंज्ञकाः ॥ ७४०

तत्त्वविमर्शिनी

[5]इन्द्रेशानदिशोर्मध्ये स्थानमन्यत् प्रकीर्तितम् ।
नैऋताम्बुदिशोर्मध्ये स्थानमन्यत् प्रकीर्तितम् ॥

---

१. स्प० प्र०, पृ० ५
२. स्प० प्र०, पृ० ४४
३. स्प० प्र०, पृ० ३३
४. स्प० प्र०, पृ० ३९
५. यो० दी० पृ० २३५

तत्त्वार्थचिन्तामणिः

(१)

[1]प्राक् संवित् प्राणे परिणता ।

(२)

[2]इत्थं तत्तदनल्पमोहदलनप्राप्तस्वरूपोदयो
योगी नित्यमनात्मभावविरहात् स्वात्मस्थितौ निर्वृतः । ७४५
दृश्यद्रष्टृविवेकविद्भवपदव्यापी विमुक्तामयो
व्युत्थानेऽपि समाधिभाग् भवति सन्मोक्षश्रियः कारणम् ॥

तन्त्रम्

[3]देयं शान्ताय दान्ताय शिवभक्तिरताय च ।
शिववन्मन्यते यस्तु आचार्यं तत्त्वपारगम् ॥
शिवाद् गुरुतरा भक्तिर्यस्य नित्यं गुणैः(गुरौ) सदा । ७५०
तस्य देयमिदं ज्ञानमन्यथा न कदाचन ॥

तन्त्रराजः

[4]सृष्टिकाली च संहारे सृष्टौ सा परमेश्वरी ।
स्थितिकाली तथा घोरा ततः संहारकालिका ॥
रक्तकाली चर्वयन्ती रक्तौघमविभेदतः ।
सुकाली यमकाली च मृत्युकाली भयावहा ॥ ७५५
भद्रकाली तथा चान्या परमादित्यकालिका ।
मार्तण्डकाली कालाग्निरुद्रकालमहोल्बणा ॥

---

१. शि० वि०, पृ० १३८; प्र० हृ०, सू० १७

२. स्प० प्र०, पृ० ३०

३. श० र० सं०, पृ० ९३

४. त० आ० वि० ४ । १७३; पृ० १८९

महाकालकुले काली महाभैरवकालिका ।
त्रयोदशविधा काली विज्ञेया नामभेदतः ॥

तपस्वी

(१)

[1]पदतरतयादिरूपं ७६०
यद्यत्कलयामि तत्तदधरं ते ।
अधरतरापि न कलना
सा काचिद्यत्र न स्थितास्यभितः ॥

(२)

[2]सुविषममतादंष्ट्रा-
विदलितजनधैर्यशोणितपिपासुः । ७६५
अहमिति पिशाच एष
त्वत्स्मृतिमात्रेण किङ्करो भवति ॥

तन्त्रसद्भावः

(१)

[3]मन्त्राणां जीवभूता तु या स्मृता शक्तिरव्यया ।
तया हीना वरारोहे निष्फलाः शरदभ्रवत् ॥

(२)

[4]आमिषं तु यथा खस्थः संपश्यन् शकुनिः प्रिये ॥ ७७०
क्षिप्रमाकर्षयेद् यद्वद् वेगेन सहजेन तु ।
तद्वदेव हि योगीन्द्रो मनोबिन्दुं विकर्षयेत् ॥

---

१. त० आ० वि० ४ । १२५; पृ० १३१
२. वि० भै० वि०, श्लो० १०४
३. शि० वि०, पृ० ४८
४. शि० वि०, पृ० ४९

यथा शरो धनुःसंस्थो यत्नेनाताड्य धावति ।
तथा बिन्दुर्वरारोहे उच्चारेणैव धावति ॥

(३)

[1]सर्वे वर्णात्मका मन्त्रास्ते च शक्त्यात्मकाः प्रिये । ७७५
शक्तिस्तु मातृका ज्ञेया सा च ज्ञेया शिवात्मिका ॥

(४)

[2]न जानन्ति गुरुं देवं शास्त्रोक्तान् समयांस्तथा ।
दम्भकोटिल्यनिरता लौल्यार्थाः क्रिययोज्झिताः ॥
अस्मात्तु कारणाद् देवि मया वीर्यं प्रगोपितम् ।
तेन गुप्तेन ते गुप्ताः शेषा वर्णास्तु केवलाः ॥ ७८०

(५)

[3]या सा तु मातृका देवि परतेजःसमन्विता ।
तया व्याप्तमिदं विश्वं सब्रह्मभुवनान्तकम् ॥
तत्रस्थं च यदा देवि व्यापितं च सुरार्चिते ।
अर्वणस्थो यथा वर्णः स्थितः सर्वगतः प्रिये ॥
तथाहं कथयिष्यामि निर्णयार्थं स्फुटं तव । ७८५

(६)

[4]या सा शक्तिः परा सूक्ष्मा निराचारेति कीर्तिता ।
हृद्बिन्दुं वेष्टयित्वाऽन्तः सुषुप्तभुजगाकृतिः ॥
तत्र सुप्ता महाभागे न किञ्चिन्मन्यते उमे ।
चन्द्राग्निरविनक्षत्रैर्भुवनानि चतुर्दश ॥

---

१. शि० वि०, पृ० ५१
२. शि० वि०, पृ० ५१
३. शि० वि०, पृ० ५१
४. शि० वि०, पृ० ५२-५४; त० आ० वि० ३ । ६७, पृ० ७७

क्षिप्त्वोदरे तु या देवी विषमूढेव सा गता । ७९०
प्रबुद्धा सा निनादेन परेण ज्ञानरूपिणा ।
मथिता चोदरस्थेन बिन्दुना वरवर्णिनि ॥
तावद्वै भ्रमवेगेन मथनं शक्तिविग्रहे ।
भेदात्तु प्रथमोत्पन्ना बिन्दवस्तेऽतिवर्चसः ॥

उत्थिता तु यदा तेन कला सूक्ष्मा तु कुण्डली । ७९५
चतुष्कलमयो बिन्दुः शक्तेरुदरगः प्रभुः ॥
मध्यमन्थनयोगेन ऋजुत्वं जायते प्रिये ।
ज्येष्ठा शक्तिः स्मृता सा तु बिन्दुद्वयसुमध्यगा ॥
बिन्दुना क्षोभमायाता रेखैवामृतकुण्डली ।
रेखिणी नाम सा ज्ञेया उभौ बिन्दू यदन्तगौ ॥ ८००
त्रिपथा सा समाख्याता रौद्री नाम्ना तु गीयते ।
रोधिनी सा समुद्दिष्टा मोक्षमार्गनिरोधनात् ॥
शशाङ्कशकलाकारा अम्बिका चार्धचन्द्रिका ।
एकैवेत्थं परा शक्तिस्त्रिधा सा तु प्रजायते ॥
आभ्यो युक्तवियुक्ताभ्यः संजातो नववर्गकः । ८०५
नवधा च स्मृता सा तु नववर्गोपलक्षिता ॥
पञ्चमन्त्रगता देवि सद्यआदिरनुक्रमात् ।
तेन पञ्चविधा प्रोक्ता ज्ञातव्या सुरनायिके ॥
स्वरद्वादशगा देवि द्वादशस्था उदाहृता ।
अकारादिक्षकारान्ता स्थिता पञ्चाशता भिदा ॥ ८१०
हृत्स्था एकाणवा प्रोक्ता कण्ठे प्रोक्ता द्वितीयका ।
त्रिराणवा तु ज्ञातव्या जिह्वामूले सदा स्थिता ॥
जिह्वाग्रे वर्णनिष्पत्तिर्भवत्यत्र न संशयः ।
एवं शब्दस्य निष्पत्तिः शब्दव्याप्तं चराचरम् ॥

(७)

[1]बध्वा पद्मासनं योगी नाभावक्षेश्वरं न्यसेत् । ८१५
दण्डाकारं तु तावत्तन्नयेद्यावत् कखत्रयम् ॥
निगृह्य तत्र तत्तूर्णं प्रेरयेत् खत्रयेण तु ।
एतां बध्वा महायोगी खे गतिं प्रतिपद्यते ॥

(८)

[2]..... पराम् ।
गतिमेत्यर्थभावेन कुलमार्गेण नित्यशः ॥ ८२०
चरते सर्वजन्तूनां खेचरी नाम सा स्मृता ।

(९)

[3]सत्त्वस्थो राजसस्थश्च तमःस्थो गुणवेदकः ।
एवं पर्यटते देही स्थानात् स्थानान्तरं व्रजन् ॥

(१०)

[4]कलोद्वलितचैतन्यो विद्यादर्शितगोचरः ।
रागेण रञ्जितात्मासौ बुध्यादिकरणैर्युतः ॥ ८२५
एवं मायात्मको बन्धः प्रोक्तस्तस्यो(स्य) दरात्मकः ।
तदाश्रयगुणो धर्मोऽधर्मश्चैव समासतः ॥
तत्रासौ संस्थितः पाश्यः पाशितस्तैस्तु तिष्ठति ।

---

१. शि० वि०, पृ० ५८
२. शि० वि०, पृ० ५८
३. शि० वि०, पृ० ७३
४. शि० वि०, पृ० ७७

तिमिरोद्घाटः

(१)

[1]करन्ध्रचितिमध्यस्था ब्रह्मपाशावलम्बिकाः ।
पीठेश्वर्यो महाघोरा मोहयन्ति मुहुर्मुहुः ॥ ८३०

(२)

[2]यः प्रियो यः सुहृद् बन्धुर्यो दाता योऽतिवल्लभः ।
तदङ्गभक्षणाद् देवि ह्युत्पतेद् गगनाङ्गना ॥

———

त्रिकसारः

(१)

[3]स्वपदा स्वशिरश्छायां यद्वल्लङ्घितुमीहते ।
पादोद्देशे शिरो न स्यात् तथेयं बैन्दवी कला ॥

(२)

[4]देहोत्थिताभिर्मुद्राभिर्यः सदा मुद्रितो बुधः । ८३५
स तु मुद्राधरः प्रोक्तः शेषा वै अस्थिधारकाः ॥

(३)

[5]विदिते तु परे तत्त्वे वर्णातीते ह्यविग्रहे ।
किङ्करत्वं तु गच्छन्ति मन्त्रा मन्त्राधिपैः सह ॥

—:०:—

---

१. शि० वि०. पृ० १७, १०२
२. शि० वि०, पृ० ६८
३. प्र० हृ०, सू० ४
४. शि० वि०, पृ० ११२
५. स्प० प्र०, पृ० ३३

त्रिकहृदयः

[1]स्वपदा स्वशिरश्छायां यद्वल्लङ्घितुमीहते ।
पादोद्देशे शिरो न स्यात्तथेयं बैन्दवी कला ॥ ८४०

—:०:—

त्रिविक्रमः

[2]अयमत्र किलाम्नायः सिद्धमुखेनागतं रहस्यं यत् ।
तत् भट्टकल्लटेन्दुर्वसुगुप्तगुरोरवाप्य शिष्याणाम् ॥

—:०:—

त्रिशिरोमतम्

(१)

[3]उभयोर्भावयोर्ज्ञाने ज्ञात्वा मध्यं समाश्रयेत् ।
युगपच्च द्वयं त्यक्त्वा मध्ये तत्त्वं प्रकाशते ॥
भावे त्यक्ते निरुद्धा चिन्नैव भावान्तरं व्रजेत् । ८४५
तदा तन्मध्यभावेन विकसत्यतिभावना ॥

(२)

[4]अपरः षोडशो यावत्कालः सप्तदशः परः ।
परापरस्तु यः कालः स प्रियेऽष्टादशः प्रभुः ॥
प्राणं एकं त्रिधा कालं कृत्वा चैव त्यजेत् पुनः ।

(३)

[5]पदैकादशिका सा च प्राणे चरति नित्यशः । ८५०
अकारश्च उकारश्च मकारो बिन्दुरेव च ॥

---

१. शि० वि०, पृ० ९
२. स्प० प्र०, पृ० १
३. त० आ० वि० १ । ८६; पृ० १२७
४. त० आ० वि० १ । ८६; पृ० १२७
५. त० आ० वि० १ । ८६; पृ० १२८

अर्द्धचन्द्रो निरोधी च नादो नादान्त एव च ।
शक्तिश्च व्यापिनी चैव समनैकादशी स्मृता ॥

(४)

[1]उन्मना तु ततोऽतीता तदतीतं निरामयम् ॥

(५)

[2]भैरवाद्भैरवीं प्राप्तः..... । ८५५

(६)

[3]चतुर्थं संप्रवक्ष्यामि ग्रामधर्मविभेदतः ।

(इत्युपक्रम्य)—

हृदिस्थं सर्वदेहस्थं स्वभावस्थं सुसूक्ष्मकम् ।
सामूह्यं चैव तत्त्वानां ग्रामशब्देन कीर्तितम् ॥
आत्मा वै धर्म इत्युक्तो ग्रामधर्मः प्रकीर्तितः ।
प्रकाशावस्थितं ज्ञानं भावाभावादिमध्यतः ॥ ८६०
स्वस्थाने वर्तनं ज्ञेयं वर्तनं वृत्तिरुच्यते ।
वृत्तिस्तु स्वपदं ज्ञात्वा द्रष्टृत्वं परिपठ्यते ॥
प्रबुद्धं तद्विजानीयाद् बाह्यावरणवर्जितम् ।
परापरविनिर्मुक्तमेकादशपदोज्झितम् ॥
स्वात्मन्यात्मनि यज्ज्ञानं शिवामृतपरिप्लुतम् । ८६५
विविक्तवस्तुकथितशुद्धविज्ञाननिर्मलः ॥
ग्रामधर्मवृत्तिरुक्तस्तन्त्रेऽस्मिन् सर्वथोदितः ।

(७)

[4]अथवा शिवमन्विच्छेत् साधकः परतत्त्ववित् ।

---

१. त० आ० वि० १ । ८६; पृ० १२८
२. त० आ० वि० १ । ८६; पृ० १२८
३. त० आ० वि० १ । ८६; पृ० १२९
४. त० आ० वि० १ । ८६; पृ० १२९

(८)

[1]स्थितिः कार्या तु तत्त्वस्था मध्यशक्तिप्रभान्विता ।

(९)

[2]सेव्यमानमधोर्ध्वं तु प्राणापानोत्थरूढधीः । ८७०
ऊर्ध्वं त्यक्त्वा तु प्रविशेद् रामस्थोऽत्रात एव च ॥

(१०)

[3]रामः किमुच्यते देव योऽत्रस्थः स च कः प्रभो ।
तस्याभ्यासः कथं नाम ब्रूहि सर्वं महेश्वर ॥

(११)

[4]रामस्थं परमेशानि योगं यत्कीर्तितं मया ।
कथयामि यथातथ्यमभ्यासस्तस्य योगतः ॥ ८७५

(१२)

[5]गच्छंस्तिष्ठंस्स्वपन् जाग्रदुन्मिषन् निमिषंस्तथा ।
धावनं प्लवनं चैव आयासः शक्तिवेदनम् ॥
बुद्धिभेदास्तथा भावाः संज्ञाकर्माण्यनेकशः ।
एतच्चतुर्दशविधं रामं तु परिकीर्तितम् ॥
व्यापितं देवदेवेन शिवेन परमात्मना । ८८०
सर्वभावान्तरस्थेन अनेकाकारलक्ष्मणा ॥
कल्मषक्षीणमनसा स्मृतिमात्रनिरोधनात् ।
ध्यायते परमं ध्येयं गमागमपदे स्थितम् ॥

---

१. त० आ० वि० १ । ८६; पृ० १२९
२. त० आ० वि० १ । ८६; पृ० १३१
३. त० आ० वि० १ । ८६; पृ० १३१
४. त० आ० वि० १ । ८६; पृ० १३२
५. त० आ० वि० १ । ९०; पृ० १३६

परं शिवं तु व्रजति भैरवाख्यं जपादपि ।
तत्स्वरूपं जपः प्रोक्तो भावाभावपदच्युतः ॥ ८८५

(१३)

[1]येन तेन हि रूपेण साधकः संस्मरेत् सदा ।
तस्य तन्मयतां याति चिन्तामणिरिवेश्वरः ॥

(१४)

[2]शिवव्योमेति या संज्ञा परं ब्रह्मेति यत्पदम् ।

(१५)

[3]आत्मस्थानं किमाख्यातं..... ।'

(१६)

[4]कुण्डल्याख्या तु सा ज्ञेया सर्वाध्वोपरिवर्तिनी । ८९०

(इत्युपक्रम्य)—

प्रमाणोत्थानरहितमुपमाभेदवर्जितम् ।
भूतव्योमपदातीतं चिद्व्योमान्तपदं परम् ॥
भावप्रत्ययसंरम्भमभावं परमा गतिः ।
शिवव्योम तु तज्ज्ञेयं सर्वाधारत्वलक्षणम् ॥
बृहत्त्वं बृंहकत्वं च सूक्ष्मं तच्चान्तवर्ति च । ८९५
परं ब्रह्मेति तत्प्रोक्तं लक्ष्यभूतमलक्ष्यकम् ॥

(तथा)

पूर्वं पदविभागं तु कीर्तितं तदहेयकम् ।
तथापि भूमिकातीतमात्मस्थानं निगद्यते ॥

---

१. त० आ० वि० १ । ११५; पृ० १५७

२. त० आ० वि० ३ १३७; पृ० १४२

३. त० आ० वि ३ । १३७; पृ० १४३

४. त० आ० वि० ३ । १३७-४०; पृ० १४२-१४३

(१७)

[1]गुरोर्गुरुतरा शक्तिर्गुरुवक्त्रगता भवेत् ।

(१८)

[2]ततो मूले उत्तरतो नन्दिरुद्रं च जाह्नवीम् । ९००
महाकालं सदंष्ट्रं च यमुनां चैव दक्षिणे ॥

(१९)

[3]यन्निरावरणं संवित्सतत्त्वं कल्पनार्जितम् ।
तत् परं पुत्रि कथितं सा काष्ठा सा परा गतिः ॥

(२०)

[4]खं हि यद् भैरवं ज्ञेयं सर्वमार्गान्तमन्तगम् ।
विचारयेत्तु यो धीमान् करणव्याप्तिमध्यगः ॥ ९०५
भूमिकास्थो हि चक्रस्थो विन्दते परमार्थतः ।

(२१)

[2]विमर्शधाम तुर्यं च व्यापकं चोर्ध्वमध्यतः ।
सुशिरं तत्त्वराजानं पराकाशं प्रकीर्तितम् ॥

(२२)

[6]ऊर्ध्वाधोगमविक्षेपरहितः करणेच्छया ।
रूपं यस्य न हीयेत भावस्थो भावभासकः ॥ ९१०
स्वरूपप्रतिपन्नोऽसावन्तःकरणवर्जितः ।
भावस्थं तं विजानीयाद् ग्राह्यग्राहकविप्लवे ॥

---

१. शि० वि०, पृ० ६०
२. त० आ० वि० ४ । २५१; पृ० २८०
३. त० आ० वि० ५ । ८७; पृ० ३९६
४. त० आ० वि० ५ । ९१; पृ० ४००
५. त० आ० वि० ५ । ९१; पृ० ४०१
६. त० आ० वि० ५ । ९२; पृ० ४०३

(२३)

[1]प्राणापानौ समौ यस्य साम्यावस्थानमागतौ ।
निस्तरङ्गप्रकारेण भावाभावावरोधदृक् ॥

(२४)

[2]स्वरूपस्थितिसंयोगलक्षवृत्तिरतस्य च । ९१५
भावनिःस्पृहमेतद्धि तत्पदत्यागवर्तिनः ॥

(२५)

[3]खमात्मा केवलं विद्यात् खमणुः सर्वदिक्कतः ।
कुलमूलं तु खं ज्ञेयं खं शक्तिः परिपठ्यते ॥
एकं तु खमिहोद्भाव्यं खद्वयं भूतिचिद्रतिः ।
द्रष्टृदृश्योपरक्तं च शक्तित्रितयं खं विदुः ॥ ९२०
निष्पन्नपरिणामेन खमभूतत्वलक्षणम् ।

(२६)

[4]ग्राह्यं च ग्राहकं चैव संवित्तिं च तृतीयिकाम् ।
संनिवेशं तथा व्याप्तिमाक्षेपं त्यागमेव च ॥
करणं सप्तधा ख्यातमभ्यासं बोधपूर्वकम् ।
तद्व्याप्तिपूर्वमाक्षेपकरणं स्वप्रतिष्ठता ॥ ९२५

(२७)

[5]ग्राह्यस्वरूपविज्ञानं द्रव्यत्वे यद्व्यवस्थितम् ।
व्यक्तिनिष्ठं तु मन्तव्यं ग्राहकं तु स्फुटार्थकम् ॥
ग्राहयेच्चित्स्वरूपं तु व्यक्ताव्यक्तविचारकम् ।
प्रत्यक्षादिप्रमाणैश्च ग्रहीता गोलकस्थितिः ॥

---

१. त० आ० वि० ५ । ९२; पृ० ४०३
२. त० आ० वि० ५ । ९२; पृ० ४०४
३. त० आ० वि० ५ । ३५; पृ० ४०५
४. त० आ० वि० ५ । १२०; पृ० ४४०
५. त० आ० वि० ५ । १२९; पृ० ४४०–४४१

गोलकं द्वारमित्युक्तं मनसा बाह्यतां ततः । ९३०
न जहाति न गृह्णाति ग्रहीता ग्राहकः स्मृतः ॥
लक्ष्यलक्षसमायोगात् प्रतिज्ञावस्तुयोगतः ।
उभयोर्नान्यविश्लेषं यथैवानुभवं स्मृतम् ॥
विचार्यमाणं यत्किञ्चित्स्वरूपविभवात्मकम् ।
संनिवेशं तु तज्ज्ञेयं तद्व्याप्तिरभिधीयते ॥ ९३५
स्वरूपस्थितिभावस्य एकदेशगतस्य च ।
घोणार्चिःप्रविकासं तु स्थानात् स्थानपदक्रमात् ॥
ज्ञायते वस्तुबोधज्ञस्त्रिप्रकारेण वस्तुनि ।
व्याप्तिस्तु कथिता सा तु सर्वज्ञा सर्वगाऽपरा ॥
अनुभूय स्वरूपं तु निवृत्तिं नैव गच्छति । ९४०
ज्ञानभेदपदप्राप्त्या अत्याक्षेपगमात्मनः ॥
स्वरूपं चिन्त्यमानोऽपि ग्राह्यप्राकारधर्मधीः ।
त्यजेत् पूर्वपदाद् भेदात् त्यागं तु परिकीर्तितम् ॥
पदस्थस्त्यागभागी च संवृतात्मपरस्य च ।
आक्षेपं तं विजानीयात् सर्वत्रावस्थितं प्रिये ॥ ९४५

(२८)

[1]अदृष्टमण्डलोऽप्येवं यः कश्चिद्वेत्ति तत्त्वतः ।
स सिद्धिभाग्भवेन्नित्यं स योगी स च दीक्षितः ॥
अविधिज्ञो विधानज्ञो जायते यजनं प्रति ।

(२९)

[2]सर्वदेवमयः कायस्तं चेदानीं शृणु प्रिये ।
पृथिवी कठित्वेन द्रवत्वेऽम्भः प्रकीर्तितम् ॥ ९५०
त्रिशिरोभैरवः साक्षाद् व्याप्य विश्वं प्रतिष्ठितः ।

---

१. त० आ० १३ । १५२-५३; पृ० ९८
२. प्र० हृ०, सू० ४

देविकाक्रमः

[1]तत्तद्रूपतया ज्ञानं बहिरन्तः प्रकाशते ।
ज्ञानादृते नार्थसत्ता ज्ञानरूपं ततो जगत् ॥
नहि ज्ञानादृते भावाः केनचिद् विषयीकृताः ।
ज्ञानं तदात्मतां यातमेतस्मादवसीयते ॥ ९५५

देवीकालोत्तरम्

(१)

[2]ज्ञानोत्पत्तिनिमित्तं तु क्रियाचर्याः प्रकीर्तिताः ।

(२)

[3]निद्राया बोधयेच्चित्तं विक्षिप्तं शमयेत् पुनः ।
पक्षद्वयपरित्यागे संप्राप्ते नैव चालयेत् ॥
निराश्रयं सदा चित्तं सर्वालम्बनवर्जितम् ।
मनोऽवस्थाविनिर्मुक्तं विज्ञानं मुक्तिलक्षणम् ॥ ९६०

(३)

[4]नात्र पूजा नमस्कारो न जपो ध्यानमेव च ।
केवलं ज्ञेयमित्युक्तं वेदितव्यं न किञ्चन ॥

---

१. म० म० प०, पृ० १०
२. श० र० सं०, पृ० ६
३. श० र० सं०, पृ० ८५
४. श० र० सं०, पृ० ८६

देव्यामतसूत्रम्

[1]भग्ने घटे यथा दीपः सर्वतः संप्रकाशते ।
देहपाते तथा चात्मा भाति सर्वत्र सर्वदा ॥

द्वयसंपत्तिः

[2]अहङ्कारमयी भूमिर्बुद्धिभूमेः परा हि सा । ९६५
तया व्याप्तमिदं विश्वं ज्ञाता सैव विमुक्तिदा ॥
संविद्रूपा पराशक्तिरभिन्ना परमेश्वरात् ।
ज्ञानशक्तिः पुनः सैव मन्त्ररूपा प्रदर्श्यते ॥
अहङ्कारः स्मृतो मन्त्रः शिवशक्त्यात्मरूपकः ।
....

यदत्राद्यमवर्णाख्यं स शिवः परमेश्वरः ॥ ९७०
नादबिन्द्वात्मकं यच्च सा शक्तिरैश्वरी स्मृता ।
द्वयमेतत् समाख्यातं बीजभूतं चराचरे ॥
अज्झलाद्याश्च ये वर्णास्तेऽनेनैव हि मुद्रिताः ।
शब्दब्रह्मेति तत्प्राहुर्योगिनस्तत्त्वचिन्तकाः ॥
अप्राणमस्वरं ध्यात्वा पश्यन्त्या निर्विभागया । ९७५
चिन्मात्रामर्शयोगेन निलीनः स्यात् परे पदे ॥
तथाहि सिद्धैरादिष्टं क्वचित् सिद्धान्तसंग्रहे ।
नाभेरूर्ध्वं वितस्तिस्तु कण्ठाधस्तात् षडङ्गुलम् ॥
हृदयं मध्यदेशे तु हृन्मध्ये कमलं स्मृतम् ।
पद्ममध्ये स्थिता सूक्ष्मा कर्णिका त्रिपथोपगा ॥ ९८०
तन्मध्ये संस्थितो ह्यात्मा ह्यकारादिस्वरूपधृत् ।
अकारान्तः परं सूक्ष्मं चिन्मात्रस्पन्दलक्षणम् ॥

---

१. ज्ञा० र० सं०, पृ० ९२
२. वि० भै० वि०, श्लो० ९०

तस्याप्युपासा विज्ञानभैरवे कथिता यथा ।
अबिन्दुमविसर्गं च ..... ॥
आत्मस्थाने निराधारा द्वितीया शक्तिरैश्वरी । ९८५
बीजभूता कुण्डलिनी सार्धत्रिवलयात्मिका ॥
प्राणशक्तिरियं देहे हकाराख्या नदत्यलम् ।
कर्णान्तर्विवरे योगी स्थगित्वा लक्षयेत् स्फुटम् ॥
बिन्दुरूपा भ्रुवोर्मध्ये संसारजननी शिवा ।
लक्ष्यते योगिभिर्नित्यं भ्राजमाना स्वतेजसा ॥ ९९०
तस्य बिन्दोस्तु चन्द्रार्कौ वामदक्षिणनेत्रयोः ।
निराश्रयौ तु तौ कृत्वा विशेद् ब्रह्म सनातनम् ॥

धातुसमीक्षा

[1]अविद्याशबलस्यास्य स्थितं मेयत्वमात्मनः ।
गृहीतं न निजं रूपं शबलेन तदात्मना ॥
सा चाऽनृतात्मिकाऽविद्या नानृतस्य हि वस्तुता । ९९५
नाऽवस्तु वस्तुनो नाशं विकारं वा करोत्यतः ॥
नाच्छादितस्य तमसा रज्जुखण्डस्य विक्रिया ।
नाशो वा क्रियते यद्वत् तद्वन्नाविद्ययाऽऽत्मनः ॥
नाऽतः स्वतो न परतो बन्धोऽस्य परमात्मनः ।
बद्धोऽथवाऽविद्यया जीवो मुक्तिस्तस्य हि तत्क्षये ॥ १०००

नन्दिशिखा

[2]अनिर्देश्यः शिवो ह्येवं कथितः परमेश्वरः ।
उपायः कथ्यतां देव भक्तानुग्रहकाम्यया ॥

---

१. स्प० प्र०, पृ० ४-५ २. त० आ० वि० १३ । १६४; पृ० १०५

नवरत्नमालिका

[1]ओङ्कारपञ्जरशुकीमुपनिषदुद्यानकेलिकलकण्ठीम् ।
आगमविपिनमयूरीमार्यामन्तर्विभावये गौरीम् ॥

नवशतीशास्त्रम्

[2]अनन्तं परमं ज्योतिः सर्वप्राणिहृदि स्थितम् । १००५

नागार्जुनः

[3]सर्वालम्बनधर्मैश्च सर्वतत्त्वैरशेषतः ।
सर्वक्लेशाशयैः शून्यं न शून्यं परमार्थतः ॥

श्रीनाथपादाः

[4]श्रयेत् स्वातन्त्र्यशक्तिं स्वां सा श्रीकाली परा कला ।

नारदसंग्रहः

(१)

[5]सर्वो विकल्पः संसारो नान्यो बन्धो विकल्पतः ।

---

१. सौ० ल० अरु०, पृ० ४०
२. यो० दी०, पृ० ६३
३. स्प० प्र०, पृ० १८
४. शि० वि०, पृ० ९२
५. स्प० प्र०, पृ० ७

(२)

[1]यथा सुभर्जितं बीजं नेह भूयः प्ररोहति । १०१०
विकल्पक्षीणचित्तस्य तथा भूयो न संसृतिः ॥

(३)

[2]गुरवे दक्षिणां दद्यात् सर्वस्वं सार्थमेव वा ।
सर्वस्वमथवाऽत्यल्पं संसारोच्छेदहेतवे ॥

निशाकुलम्

(१)

[3]स्फटिकोपलगो रेणुः किं तस्य कुरुतां प्रिये ।
व्योम्नीव नीलं हि मलं मलशङ्कां ततस्त्यजेत् ॥ १०१५

(२)

[4]न मलो मलिनः कश्चिद्विद्यते वस्तुतः प्रिये ।
स्वमनोमलिनत्वेन मलमात्मनि कथ्यते ॥
मलमायाविचारेण क्लिश्यन्ते स्वल्पबुद्धयः ।
स्फटिकोपलगो रेणुः किं तस्य कुरुतां प्रिये ॥
अज्ञानमात्रं तु मलं ज्ञानं शुद्धं स्वभावतः । १०२०
शुद्धस्वभावबोधस्य न बन्धः स्यात् कदाचन ॥
आकाशे नीलिमा यद्वन्मलमेवं चिदात्मनः ।

---

१. स्प० प्र०, पृ० २१
२. स्प० प्र०, पृ० ५४
३. म० म० प०, पृ० ३३
४. त० आ० वि० १३ । १२७; पृ० ८४-८५

निशाचारः

(१)

[1]संज्ञा हि त्रिविधा ज्ञेया शिवशास्त्रेषु सर्वदा ।
पारिभाषिकनैमित्ती सिद्धा चासौ प्रसिद्धिभाक् ॥
इह नैमित्तिकी संज्ञा निमित्तात्तु समागता । १०२५

निशाटनम्

(१)

[2]त्रिप्रत्ययमिदं ज्ञानमात्मा शास्त्रं गुरोर्मुखम् ।

(२)

[3]एषा तु कौलिकी विद्या सर्वसिद्धिप्रदायिका ।
सकाशाद् देवदेवस्य निर्याता शक्तिवर्त्मनि ॥
वामेश्वर्यवतारे तु प्रकाशत्वमुपागता ।

(३)

[4]त्रिप्रत्ययमिदं ज्ञानमात्मा शास्त्रं गुरोर्मुखम् । १०३०
प्राधान्यात् स्वोपलब्धिः स्याद्विकल्पार्णवतारिणी ॥
विकल्पाज्जायते शङ्का सा शङ्का बन्धरूपिणी ।
बन्धोऽन्यो नहि विद्यते ऋते शङ्कां विकल्पजाम् ॥
विकल्पायासयुक्तस्य नहि स्याच्छ्रेयसी गतिः ।
मन्त्रशङ्कात्मशङ्का च द्रव्यशङ्का तथा पुनः ॥ १०३५
भूतशङ्का तथा दिव्यकर्मशङ्का परा मता ।
पञ्चधा तु स्मृता शङ्का तत्त्वशङ्का परा स्मृता ॥
षड्विधां कथयिष्यामि यथा मोक्षमवाप्स्यसि ।

---

१. त० आ० वि० ६ । ३३; पृ० ३३
२. त० आ० वि० ४ । ७९; पृ० ८४
३. त० आ० वि० ४ । १७७; पृ० २०७
४. त० आ० वि० १३ । १९८; पृ० १२६–१२७

(इत्याद्युपक्रम्य)—

तस्मात् सर्वप्रयत्नेन स्वात्मप्रत्ययकारणम् ।
स्वसंवित्तिकरं नृणां नरशक्तिशिवात्मकम् ॥ १०४०
बोद्धव्यं लयभेदेन यथा प्रत्ययमात्मनि ।
विकल्पक्षीणचित्तस्तु परमाद्वैतभावितः ॥
मुच्यते नात्र सन्देह इति सत्यं ब्रवीमि ते ।

निःश्वासागमः

(१)

[1]स्नानेन निर्मलो मन्त्रजपात् सिद्धिर्न संशयः ।
पूजायां सन्निधानं न होमो नैव फलप्रदः ॥ १०४५
ध्यानेन सर्वगं देवं योगैर्योगित्वमाप्नुयात् ।
व्रतेन कायशुद्धिः स्याद् दीक्षया मुक्तिरिष्यते ॥

(२)

[2]स चेतनः स्मृतो जीवो यदा शक्त्या तु युज्यते ।
अन्यथा निष्कलो ह्यात्मा विषसुप्तेव लक्ष्यते ॥

(३)

[3]एकैव वस्तुतः शैवी या शक्तिर्निर्मला परा । १०५०
अविनाभाविनी शम्भोः शुचेरुष्णमिव प्रभोः ॥
तयात्मशिवयोः सन्धिः शिवबोधपरापरा ।

---

१. श० र० सं०, पृ० ६९
२. श० र० सं०, पृ० ७२
३. श० र० सं०, पृ० ७४

(४)

[1]यस्य जाग्रे प्रलीयन्ते सर्वे भावाः सुषुप्तवत् ।
पर्याप्तं तस्य विज्ञानं त्रिपदं तेन लङ्घितम् ॥

(५)

[2]यदा मनः परे तत्त्वे लब्धलक्ष्यं निलीयते । १०५५
तदा ह्यशेषविज्ञानं विनाशमुपगच्छति ॥

(६)

[3]लयातीतः परो देवो निरुपाख्यो निरामयः ।
ज्ञात्वैवमुच्यते ज्ञानी भुञ्जानो विषयानपि ॥

(७)

[4]संसृष्टश्च स्वलीनश्च विक्षिप्तो गतिरागतिः ।
मनश्चतुर्विधं प्रोक्तं तस्य भेदमिमं शृणु ॥ १०६०
न मनो नापि मन्तव्यो न मन्ता च विभाव्यते ।
स्वलीनो विषयैर्मुक्त एकीभूतः सुषुप्तिवत् ॥
विषयान् गृह्यमाणोऽपि ज्ञेयत्वमधिगच्छति ।
न च तैर्युज्यते ज्ञानैः संश्लिष्टः स तु उच्यते ॥
अज्ञानाद् गच्छति ज्ञानं ज्ञानादज्ञानमेव च । १०६५
चलते यस्य दौर्बल्यात् तस्याऽसौ गतिरागतिः ॥
ज्ञानेन श्लिष्यते यस्मादिन्द्रियार्थपरायणः ।
त्रिकालमाकुलो नित्यं स तु विक्षिप्त उच्यते ॥
स्वलीनश्चोत्तमस्तत्र गुणातीतो निरामयः ।
मध्यमः स तु विज्ञेयः संश्लिष्टः सात्त्विकः स्मृतः ॥ १०७०

---

१. श० र० सं०, पृ० ८२
२. श० र० सं०, पृ० ८३
३. श० र० सं०, पृ० ८४
४. श० र० सं०, पृ० ८४

अधमश्चपलः क्षुद्रो राजसो गतिरागतिः ।
तामसः स तु विक्षिप्तश्चतुर्थो ह्यधमाधमः ॥
गुणात्मकः समुद्दिष्टो मलप्रायश्च देहिनाम् ।
निर्गुणं त्वधिकत्वेन यत्र लीनो भविष्यति ॥
मनसश्च स्वलीनस्य यत् सुखं ह्यात्मसाक्षिकम् । १०७५
योगावस्था परा ह्येषा प्राहुर्योगविदो जनाः ॥

(८)

[1]यथा वायुः सुशीघ्रोऽपि मुक्त्वाऽऽकाशं न गच्छति ।
ज्ञेये निक्षिप्तचित्तस्तु विषयस्थो न मुञ्चति ॥

(९)

[2]भुङ्क्ते तु विषयान् सर्वानसौ लेप्यस्यालेपकः ।
यस्य सर्वगतो भावो शंभावस्थो निरन्तरः ॥ १०८०

(१०)

[3]प्रकटयस्वेदं ज्ञानं मद्भक्तानां वरानने ।
रक्षणीयं प्रयत्नेन तस्करेभ्यो धनं यथा ॥

निःश्वासोत्तरम्

[4]एक एव शिवः शक्तिस्तथा कार्याणि भेदतः ।
तस्माच्छिवात्मिका शक्तिर्भोगमोक्षौ शिवेच्छया ॥

---

१. श० र० सं०, पृ० ८६
२. श० र० सं०, पृ० ८७
३. श० र० सं०, पृ० ९३
४. श० र० सं०, पृ० ७४

नैःश्वासतन्त्रम्

[1]त्वमेकांशेनान्तरात्मा नर्तकः कोशरक्षिता । १०८५

पञ्चरात्रोपनिषत्

[2]ज्ञाता च ज्ञेयं च वक्ता च वाच्यं च भोक्ता च भोग्यं च ।

पञ्चरात्रश्रुतिः

[3]यद्वत् सोपानेन प्रासादमारुहेत् प्लवेन वा नदीं तरेत् तद्वच्छास्त्रेणैव हि भगवान् शास्ताऽवगन्तव्यः ।

पञ्चशतिकम्

(१)

[4]मन्त्रोदया व्योमरूपा व्योमस्था व्योमवर्जिता ।
सर्वा सर्वविनिर्मुक्ता विश्वस्मिन् सृष्टिनाशिनी ॥ १०९०
या कला विश्वविभवा सृष्ट्यर्थकरणक्षमा ।
यदन्तः शान्तिमायाति सृष्टिकालीति सा स्मृता ॥

---

१. शि० वि०, पृ० ८९
२. स्प० प्र०, पृ० ४०
३. स्प० प्र० पृ० २
४. त० आ० वि० ४ । १४८; पृ० १५८

(२)

[1]न चैषा चक्षुषा ग्राह्या न च सर्वेन्द्रियस्थिता ।
निर्गुणा निरहङ्कारा रञ्जयेद्विश्वमण्डलम् ॥
सा कला तु यदुत्पन्ना सा ज्ञेया रक्तकालिका । १०९५

(३)

[2]हासिनी पौद्गली येयं वालाग्रशतकल्पना ।
कल्पते सर्वदेहस्था स्थितिः सर्गस्य कारिणी ॥
यदुत्पन्ना तु सा देवी पुनस्तत्रैव लीयते ।
तां विद्धि देवदेवेश स्थितिकालीं महेश्वर ॥

(४)

[3]यमरूपस्वरूपस्था रूपातीतस्वरूपगा । ११००
सा कला लीयते यस्यां यमकाली तु सा स्मृता ॥

(५)

[4]चण्डकाली शुद्धवर्णा याऽमृतग्रसनोद्यता ।
भावाभावविनिर्मुक्ता विश्वसंहाररूपिणी ॥
यत्र सा याति विलयं सा च संहारकालिका ।

(६)

[5]ओमित्येषा कुलेशानी मृत्युकालान्तपातिनी । ११०५
मृत्युकालकला यस्याः प्रविशेद्विग्रहं शिव ॥
तदा सा मृत्युकालीति ज्ञेया गिरिसुताधव ।

---

१. त० आ० वि० ४ । १४९; पृ० १६०
२. त० आ० वि० ४ । १५०; पृ० १६३
३. त० आ० वि० ४ । १५१; पृ० १६५
४. त० आ० वि० ४ । १५२; पृ० १६६
५. त० आ० वि० ४ । १५४; पृ० १६९

(७)

[1]गमाममसुगम्यस्था महाबोधावलोकिनी ।
मायामलविनिर्मुक्ता विज्ञानामृतनन्दिनी ॥
सर्वलोकस्य कल्याणी रुद्रा रुद्रसुखप्रदा । १११०
यत्रैव शाम्यति कला रुद्रकालीति सा स्मृता ॥
भेदस्य द्रावणाद् भद्रा भद्रसिद्धिकरीति या ।

(८)

[2]शब्दब्रह्मपदादीता षट्त्रिंशान्तनवान्तगा ।
ब्रह्माण्डखण्डादुत्तीर्णा मार्तण्डी मूर्तिरव्यया ॥
सा कला लीयते यस्यां मार्तण्डी कालिकोच्यते । १११५

(९)

[3]एकाकिनी चैकवीरा सुसूक्ष्मा सूक्ष्मवर्जिता ।
परमात्मपदावस्था परापरस्वरूपिणी ॥
सा कला पररूपेण यत्र संलीयते शिवः ।
सा कला परमार्केति ज्ञेया भस्माङ्गभूषण ॥

(१०)

[4]वरदा विश्वरूपा च गुणातीता परा कला । ११२०
अघोषा सास्वरारावा कालाग्निग्रसनोद्यता ॥
निरामया निराकारा यस्यां सा शाम्यति स्फुटम् ।
कालाग्निरुद्रकालीति सा ज्ञेयामरवन्दित ॥

---

१. त० आ० वि० ४ । १५८; पृ० १७३
२. त० आ० वि० ४ । १६३; पृ० १७८
३. त० आ० वि० ४ । १६५; पृ० १८१
४. त० आ० वि० ४ । १६८; पृ० १८३

(११)

[1]ऋतोज्ज्वला महादीप्ता सूर्यकोटिसमप्रभा ।
कलाकलङ्करहिता कालस्य कलनोद्यता ॥ ११२५
यत्र सा लयमाप्नोति कालकालीति सा स्मृता ।

(१२)

[2]दशसप्तविसर्गस्था महाभैरवभीषणा ।
संहरेद् भैरवान् सर्वान् विश्वं च सुरपूजित ॥
सान्तः शाम्यति यस्यां च सा स्याद् भरितभैरवी ।
महाभैरवचण्डोग्रघोरकाली परा च सा ॥ ११३०

(१३)

[3]डकला भीषणा रौद्रा कुलकालिनिराकुला ।
अलक्ष्या लक्ष्यनिर्लक्ष्या सुकाली नाम सिद्धिदा ॥

पद्यवाहिनी

(१)

[4]षट्कोणं शिरसि ध्यात्वा पश्चिमादिष्वनुक्रमात् ।
कोणेषु पूजयेदष्टाविंशकं च यथाक्रमात् ॥
चतुष्कं पञ्चकं षट्कं चतुष्कं पञ्चकं पुनः । ११३५
चतुष्कमिति संभिन्नाः क्रमात् पार्थिवरश्मयः ॥

---

१. त० आ० वि० ४ । १७०; पृ० १८६
२. त० आ० वि० ४ । १७२; पृ० १८७
३. त० आ० वि० ४ । १७३; पृ० १८९
४. सौ० ल० सौभा०, श्लो० १४

(२)

[1]चतुष्कं च चतुष्कं च षट्कं भूयश्चतुष्ककम् ।
पञ्चकं त्रिकमित्येव भिन्ना जलमरीचयः ॥

(३)

[2]पञ्चकं पञ्चकं षट्कं चतुष्कं पञ्चकं पुनः ।
षट्कमित्थं क्रमाद्भिन्नास्तैजसक्रमरश्मयः ॥ ११४०

(४)

[3]चतुष्कं पञ्चकं षट्कं चतुष्कं पञ्चकं त्रिकम् ।
इति क्रमेण भिन्नाः स्युर्वायवीया मरीचयः ॥

(५)

[4]षट्कं षट्कं पुनः षट्कं षट्कं षट्कं पुनश्च तत् ।
इति क्रमात् समुद्दिष्टा नाभसा दिव्यरश्मयः ॥
साधकेन समभ्यर्च्यो मध्ये देवो यथाविधि । ११४५

(६)

[5]चतुष्कं पञ्चकं चैव चतुष्कं सप्तकं पुनः ।
चतुष्कमष्टकं चेति क्रमान्मानसरश्मयः ॥
मूलाधारादिचक्रेषु पूजयेद्वा प्रकारतः ।

---

१. सौ० ल० सौभा०, श्लो० १४
२. सौ० ल० सौभा०, श्लो० १४
३. सौ० ल० सौभा०, श्लो० १४
४. सौ० ल० सौभा०, श्लो० १४
५. सौ० ल० सौभा०, श्लो० १४

परमार्थसंग्रहः

(१)

[1]परमं यत् स्वातन्त्र्यं दुर्घटसम्पादनं महेशस्य ।
देवी मायाशक्तिः स्वात्मावरणं शिवस्यैतत् ॥ ११५०

पराख्यसंहिता

(१)

[2]सन्निधानेन यस्याऽस्मिन् सर्वकार्यस्य सम्भवः ।
अक्षहीनेऽपि सामर्थ्यं दृष्टं तत्कर्षणात्मनि ॥
सामर्थ्यं तद्वदीशस्य सर्वकृत्ये निसर्गजम् ।

(२)

[3]चिद्रूपमात्मनो रूपं दृक्क्रियागुणलक्षितम् ।
ज्ञानरूपस्थितस्यापि स्वरूपं दृक्क्रियात्मकम् ॥ ११५५
कर्तृशक्तिरणोर्नित्या विम्बी चेश्वरशक्तिवत् ।
तमश्छन्नतयाऽर्थेषु नाभाति निरनुग्रहा ॥

(३)

[4]दृक्क्रियात्मकमैश्वर्यं यस्य तद् दातृपूर्वकम् ।
ईश्वरः सोऽत्र मन्तव्यः शक्तिद्वययुतः प्रभुः ॥

(४)

[5]निमित्तमीश्वराख्यं तद् यद् दृष्टं सहकारणम् । ११६०
उपादानं च यत् सूक्ष्मं सर्वकार्येषु संहितम् ॥

---

१. म० प०, पृ० ४६
२. श० र० सं०, पृ० ८
३. श० र० सं०, पृ० १६
४. श० र० सं०, पृ० १६
५. श० र० सं०, पृ० २४

(५)

[1]मूर्ताः सावयवा येऽर्था नानारूपपरिच्छदाः ।
स्थूलावयवशिष्टत्वाद् बुद्धिमद्धेतुपूर्वकाः ॥
अतोऽस्ति बुद्धिमान् कश्चिदीश्वरः समवस्थितः ।

(६)

[2]देहान्योऽनश्वरो व्यापी विभिन्नः समलोऽजडः । ११६५
स्वकर्मफलभुक् कर्ता किञ्चिज्ज्ञः सेश्वरः पशुः ॥

(७)

[3]विभुः सन् ज्ञानरूपोऽपि प्रदेशे वेत्ति येन तत् ।
किञ्चिज्ज्ञस्तेन स प्रोक्तो व्यवधानादिदर्शनात् ॥

(८)

[4]शिवत्वाद् युज्यते मोक्षे पशुत्वाद् युज्यते तनौ ।
भोगेष्वपि च सामर्थ्यात् कर्मणो मुनिसत्तम ॥ ११७०

(९)

[5]ज्ञानादीनामुपायानां दीक्षा कारणमिष्यते ।
चतुर्णामङ्गता प्रोक्ता तत्स्वरूपविभागतः ॥

---

१. श० र० सं०, पृ० २५-२६
२. श० र० सं०, पृ० ३२
३. श० र० सं०, पृ० ७१
४. श० र० सं०, पृ० ७३
५. श० र० सं०, पृ० ७७

परापञ्चाशिका

(१)

[1]अहमि प्रलयं कुर्वन्निदमः प्रतियोगिनः ।
पराक्रमपरो भुङ्क्ते स्वभावमशिवापहम् ॥

(२)

[2]सिसृक्षोः प्रथमः स्पन्दः शिवतत्त्वं प्रभोः स्मृतम् ॥ ११७५

(३)

[3]अनुत्तरेच्छा उन्मेष आनन्देशनमूनता ।
क्रियेच्छाज्ञानशक्तीनां सत्ता चोच्छूनता च षट् ॥

(४)

[4]इच्छेषणान्तरारूढाः स्फुटास्फुटजगन्मयाः ।
चत्वारः परतो वर्णाः षण्ढात्मानः प्रचोदिताः ॥

(५)

[5]सर्वसंविन्नदीभेदाभिन्नविश्रान्तिभूमये । ११८०
नमः प्रमातृवपुषे शिवचैतन्यसिन्धवे ॥

(६)

[6]स्वांशरूपेषु भानेषु मायासत्त्वविभेदधीः ।
विद्याशक्तिविशुद्धिश्च सिद्धिं प्राकाम्यसंज्ञिताम् ॥
एताः सर्वोपचारेण पूजयेद्देवताः क्रमात् ।

---

१. यो० दी० पृ० ७६, ८७; सौ० ल० सौभा०, श्लो० ३२
२. यो० दी०, पृ० २८२
३. यो० दी०, पृ० २८९
४. यो० दी०, पृ० २८९
५. यो० दी०, पृ० २९३
६. यो० दी०, पृ० २९९

(७)

[1]द्विधेयं मातृका देवी बीजयोन्यात्मना स्थिता । ११८५

परास्तोत्रम्

(१)

[2]एके भूजलखानिलानलकलारब्धां बहिः प्रक्रिया-
मुत्तीर्णत्विषमन्तरेव कतिचित् चित्काकणीमूचिरे ।
अन्ये केचन यामलामृतसरित्संभेदसंभोगिनो
मातस्त्वामपृथक्प्ररोहमुभयोरौचित्यमाचक्षते ॥

(२)

[3]आनन्दोदयलक्ष्मणोरकलुषैरुत्पक्ष्मणोरूष्मलै- ११९०
रक्ष्णोरुन्मिषितैः प्रताप्य पृथिवीमन्तःस्थलैकस्पृशः ।
पूर्णाहम्प्रथनोत्सवाय सुधियो यामूर्ध्वमध्यासते
सा काचित् त्वमचिन्त्यसिद्धिरचला मुद्रा महत्युच्यसे ॥

(३)

[4]दातॄणां करपल्लवेषु करिणां गण्डेषु पृथ्वीरुहां
पुष्पेषु स्तनमण्डलेषु सुदृशामंसेषु भूमीभुजाम् । ११९५
कण्ठाग्रेषु च गायतां कवयतां जिह्वासु चेतस्विनां
सङ्कल्पेषु च कल्पयन्ति कतिचिद् धन्यास्तवैवोद्यमम् ॥

---

१. यो० दी०, पृ० १३२, ३०२
२. म० म० प०, पृ० ७८
३. म० म० प०, पृ० ९४
४. म० म० प०, पृ० १०७

(४)

[1]मातुर्गर्भसमुद्गकादवतरन्नुर्वीमिमामर्भक-
स्तत्पूर्वं स्तनचूचुकप्रणयिना मुग्धेन वक्त्रेण ते ।
आचष्टे तदनश्वरं पदमहंकुर्वन् परे किं पुनः १२००
क्रीडाकञ्चुलिका कलेवरमयी कुत्रापि न त्यज्यते ॥

(५)

[2]पृथ्वी पूर्वमितो वनं तरुरतस्तत्रापि शाखा ततः
पत्रं तत्र च पुष्पमत्र च फलं माधुर्यमस्मादिति ।
एकस्मादपि तारतम्यपदवीमुत्कर्षणीं पश्यतो
विश्वस्मादपि कापि सिध्यति परे त्वामेव तां ब्रूमहे ॥ १२०५

पर्यन्तपञ्चाशिका

(१)

[3]स हि भैरवसिद्धान्तपूर्वपक्षोऽपि यन्मयः ।

(२)

[4]शुद्धिर्बहिष्कृतार्थानां स्वाहन्तायां निमज्जनम् ।

(३)

[5]अनन्तैतावदाकारस्वीकारेऽप्येकलक्षणाम् ।
तां स्वसंविदमाविश्य विकल्पान्न विकल्पयेत् ॥

---

१. म० म० प०, पृ० १४०
२. म० म० प०, पृ० १४८
३. म० म० प०, पृ० १२
४. म० म० प०, पृ० ४५
५. म० म० प०, पृ० ४९

(४)

[1]चित्स्वाभाव्यादसौ देवः स्वात्मना विमृशन् प्रभुः । १२१०
अनाश्रितादिभूम्यन्ता भूमिकाः प्रतिपद्यते ॥

(५)

[2]तत्र वाचकवाच्यात्मस्पन्दयोरेकशः प्रभोः ।
स्थूलसूक्ष्मपराभासक्रमयोः षड्विधाऽध्वता ॥

पादुकोदयः

(१)

[3]अतो विश्वात्मको नाथः ..... ।

(इत्यारभ्य)—

लोकायतानां देहात्मा शून्यात्मा शून्यवादिनाम् । १२१५
क्षणात्मा क्षणनिष्ठानां भिन्नात्मा भेददर्शिनाम् ॥
मीमांसिनामपूर्वात्मा ब्रह्मात्मा ब्रह्मवादिनाम् ।
अद्वैतिनामभेदात्मा बहुना वा किमुच्यते ॥
आक्रीडनं च बालानां स एव परमो गुरुः ।
स एव च महार्थात्मा माहार्थिकमनीषिणाम् ॥ १२१२

(२)

[4]विमर्शो बिन्दुनादौ च स्फोटः शब्दश्च वाक् क्रमः ।

---

१. म० म० प०, पृ० ७०
२. म० म० प०, पृ० ७२
३. म० म० प०, पृ० ११–१२
४. म० म० प०, पृ० ९०

(३)

[1]तत्र यत् पूज्यमस्माकं शक्तीनां मण्डलं महत् ।
स्वस्वभावात्मके शम्भौ तत् कृत्स्नं पर्यवस्यति ॥
सोऽपि देवे गुरौ स्वात्मन्यैकात्म्यमुपगच्छति ।
स च स्वभावादेकः सन्ननेक इव भासते ॥ १२२५
आरभ्य मङ्गलादीप्तिशिवानन्दादिकं क्रमम् ।
अम्बानाथपदाध्यासात् पारम्पर्येण पूज्यते ॥
शक्तिः शिवो देवपाणिर्दक्षिणामूर्तिरित्यपि ।
अन्यथा वा समाख्यातो लोके सोऽयमलौकिकः ॥
तत्तत्कालानुगुण्येन देवैस्तैस्तैर्बुभुत्सुभिः । १२३०
तत्तत्पृथक्त्वमायाति कल्लोलैरिव भानुमान् ॥
वैचित्र्यं च शरीरादेस्तस्यैवेच्छाविजृम्भितम् ।
तद्विकल्पेन नानात्वं ज्ञेयं तत्पादुकास्वपि ॥

(४)

[2]जगतो रञ्जनाद् राजा साक्षाद् देवो महेश्वरः ।
तत्पुत्रा राजपुत्राः स्युः ..... ॥ १२३५

(५)

[3]भासा च नाम प्रतिभा महती सर्वगर्भिणी ।
स्वस्वभावशिवैकात्मदेशिकात्मकचिन्मयी ॥
यस्यां हि भित्तिभूतायां मातृमेयात्मकं जगत् ।
प्रतिबिम्बतया भाति नगरादीव दर्पणे ॥
स्वातन्त्र्यरूपा सा काचिच्चिच्छक्तिः परमेष्ठिनः । १२४०
तन्मयो भगवान् देवो गुरुर्गुरुमयी च सा ॥

---

१. म० म० प०, पृ० ९९
२. म० म० प०, पृ० १०३
३. म० म० प०, पृ० १०५

पूजारहस्यम्

(१)

[1]औन्मुख्यमिच्छा ज्ञानं च क्रियेत्येतच्चतुष्टयम् ।
स्पन्दनं देवदेवस्य बोधभैरवरूपिणः ॥
औदासीन्यप्रहाणेन यदौन्मुख्यं महेशितुः ।
तदिदं स्याज्जगत् सर्वमित्यस्मिन् किं नु युक्तिभिः ॥ १२४५

पौष्करागमः

(१)

[2]चिन्तामणौ स्वरूपेण न किञ्चिदुपलभ्यते ।
अथ चाभिमतं सूते ब्रह्मैवं सर्वशक्तिकम् ॥

(२)

[3]अदृष्टविभवाच्छान्ताच्छिवात् परमकारणात् ।
नादरूपं विनिष्क्रान्तं शास्त्रम्.....॥

(३)

[4]सदाशिवोऽपि भगवान् नादरूपतयागतम् । १२५०
षट्पदार्थमयं ज्ञानमनेकच्छद एव तत् ॥

(४)

[5]वागिन्द्रियानपेक्षस्य शक्तिः सर्वत्र निःसृता ।
अत्यन्तविमलत्वेन तया वक्ति किमद्भुतम् ॥

---

१. म० म० प०, पृ० ४२
२. स्प० प्र०, पृ० ३
३. श० र० सं०, पृ० ७
४. श० र० सं०, पृ० ८
५. श० र० सं०, पृ० ८

(५)

[1]तेनोक्तं परमेशेन श्रीकण्ठाय महात्मने ।
श्रीकण्ठाह्वयो लब्धास्तेभ्यो लब्धाः सुमानवाः ॥ १२५५

(६)

[2]ज्ञानक्रिये शिवे प्रोक्ते सर्वार्थे निर्मले परे ।

(७)

[3]साधकस्य तु लक्ष्यार्थं तस्य रूपमिदं स्मृतम् ।

(८)

[4]अदेहस्यापि कर्तृत्वं स्वदेहप्रेरणे यथा ।

(९)

[5]लयभोगाधिकाराणां न भेदो वास्तवः शिवे ।
किन्तु बिन्दोरणूनां च वास्तवा एव ते मताः ॥ १२६०

(१०)

[6]मायापि नात्रोपादानं मोहकत्वात् स्वतेजसा ।

(११)

[7]निमित्तमीश्वरस्तेषामुपादानं स बिन्दुराट् ।
नृकर्म सहकारी स्यात् कार्यमेतत् त्रिहेतुकम् ॥

---

१. श० र० सं०, पृ० १२
२. श० र० सं०, पृ० १९
३. श० र० सं०, पृ० २०
४. श० र० सं०, पृ० २१
५. श० र० सं०, पृ० २३
६. श० र० सं०, पृ० २५
७. श० र० सं०, पृ० २५

(१२)

[1]सर्वकार्ये यतः कर्तुर्भावमालोच्य वस्तुगम् ।
प्रवृत्तिर्दृश्यते यस्मात् स भावः सत्त्ववाचकः ॥ १२६५
तेन तत्प्राक् चितेर्भावः कर्मवत् किं न मन्यसे ।

(१३)

[2]उभयोः कृषिसाम्येऽपि कश्चिद् धान्यानि गच्छति ।
न किञ्चिदपरस्तस्य कर्म कारणकं द्विजाः ॥

(१४)

[3]पक्षधर्मः सपक्षे सद् व्यावृत्तश्च विपक्षतः ।
अबाधोऽसत्प्रतिपक्षो व्यतिरेकान्वयात्मकः ॥ १२७०

(१५)

[4]प्रलयेऽप्यनुगृह्णाति सृजत्यवति हन्ति च ।
तिरोदधाति भगवान् न कालापेक्षया सदा ॥

(१६)

[5]प्रवर्तमानो देहादिश्चेतनाऽधिष्ठितः सदा ।
स्वतः प्रवृत्तिशून्यत्वाज्जडत्वेन पटादिवत् ॥
यस्तु प्रवर्तकः सोऽयमात्मेति परिपठ्यते । १२७५

(१७)

[6]पशुः पशुत्वसंयोगान्न मुक्तः पशुरुच्यते ।

---

१. श० र० सं०, पृ० २५
२. श० र० सं०, पृ० २५
३. श० र० सं०, पृ० २६
४. श० र० सं०, पृ० ३१
५. श० र० सं०, पृ० ३५
६. श० र० सं०, पृ० ३६

(१८)

[1]यस्मात् स्वदृक् क्रियाशालिकलाहीनोऽप्यनीश्वरः ।
व्यापकश्चिन्मयः सूक्ष्मः शिववत् संव्यवस्थितः ॥

(१९)

[2]परा वागीश्वरी विद्या मायाऽविद्याऽपरा स्मृता ।

(२०)

[3]शिवे कर्तरि तादात्म्यान्नेयं कुण्डलिनी स्थिता । १२८०
उपादानत्वतो हेतोः कुलाले मृत्तिका यथा ॥

(२१)

[4]मायापि मात्रोपादानं मोहकत्वात् स्वतेजसा ।
यतः प्रबुद्धपुंस्काय करणानां न कारणम् ॥
शुद्धाध्ववर्तिनः सर्वे प्रबुद्धाः शिवतेजसा ।
तस्माच्छुद्धाध्वनश्चा(स्त)स्य स्वानुकार्येव कारणम् ॥ १२८५
इष्यतां कुण्डलिन्याख्यं शुद्धमेतद् द्विजोत्तमाः ।

(२२)

[5]किञ्च रुद्राणवो येन बध्यन्ते यत्र वा स्थिताः ।
विमुच्यन्ते यतो वाऽयं स बिन्दुरिति गम्यताम् ॥

(२३)

[6]वृत्तिस्तत्त्वात्मिका चास्य चतुर्थी संव्यवस्थिता ।
शिवतत्त्वं सदेशाख्यमीशं विद्याह्वयं तथा ॥ १२९०
शुद्धान्येतानि तत्त्वानि रुद्राणूनां महात्मनाम् ।

---

१. श० र० सं०, पृ० ३६
२. श० र० सं०, पृ० ४०
३. श० र० सं०, पृ० ४०
४. श० र० सं०, पृ० ४०
५. श० र० सं०, पृ० ४१
६. श० र० सं०, पृ० ४४

(२४)

[1]मयत्यस्माद् जगत् सर्वं तेन माया समीरिता ।

(२५)

[2]तन्मात्राणि पृथिव्यादेः सूक्ष्माण्येभ्यस्त्वहङ्कृतिः ।
तस्याः सूक्ष्मतरा बुद्धिस्तस्याः प्रकृतिरेव च ॥
तस्याः कलादिवर्गश्च माया सूक्ष्मतरा ततः । १२९५
यत्र सौक्ष्म्यपराकाष्ठा सा मायेत्यभिधीयते ॥

(२६)

[3]क्षोभकोऽत्र महातेजाः श्रीकण्ठोऽनन्तविक्रमः ।
प्रवृद्धः परमेशानः शक्तिसम्पर्कमात्रतः ॥
गुणादिक्षितिपर्यन्तं तत्त्वजातं यतो भवेत् ।

(२७)

[4]नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि । १३००

(२८)

[5]कर्मनाशाद् मलस्यापि विपाके सहकारिणी ।
पतत्युन्मीलनी शक्तिस्तदानुग्रहरूपिणी ॥

(२९)

[6]वैराग्यं जायते क्षिप्रं संसाराद् दुःखसागरात् ।
दिदृक्षा जायते शम्भोः पादपङ्कजयोरपि ॥

---

१. श० र० सं०, पृ० ४६
२. श० र० सं०, पृ० ४८
३. श० र० सं०, पृ० ५१
४. श० र० सं०, पृ० ५७
५. श० र० सं०, पृ० ६५
६. श० र० सं०, पृ० ६७

कदा द्रक्ष्यामि देवेशं मोक्ष्येऽहं बन्धतः कदा । १३०५
को वा दर्शयिता शम्भोरिति संजायते मतिः ॥
एवं संसारतो भीतमनुगृह्णाति चेश्वरः ॥

(३०)

[1]दीक्षैव मोचयेत् पाशान् शिवत्वं च ददात्यणोः ।

(३१)

[2]शिवस्य समवेता या शक्तिर्ज्ञानात्मिकाऽमला ।
सैव ज्ञानमिति प्रोक्तं शास्त्रं तदनुमापकम् ॥ १३१०

(३२)

[3]साधकस्य तु लक्ष्या(रक्षा)र्थं तस्य रूपमिदं स्मृतम् ।
सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ॥

(३३)

[4]न मोक्षं याति पुरुषः स्वसामर्थ्यात् कदाचन ।
मुक्त्वा प्रसादं देवस्य शिवस्याऽशिवहारिणः ॥

---

१. श० र० सं०, पृ० ७०
२. श० र० सं०, पृ० ७४
३. श० र० सं०, पृ० ७५
४. श० र० सं०, पृ० ७९

प्रबोधपञ्चदशिका

(१)

[1]तस्या भोक्त्र्याः स्वतन्त्राया भोग्यैकीकार एष यः । १३१५
स एव भोगः सा मुक्तिः स एव परमं पदम् ॥

प्रभाकौलम्

(१)

[2]वामे वीराः समाख्याताः ।

(२)

[3]यावत् तत् परमं शान्तं न विजानन्ति सुन्दरि ।
तावत् पूजाजपध्यानहोमलिङ्गार्चनादिकम् ॥
विदिते तु परे तत्त्वे सर्वाकारे निरामये । १३२०
क्व पूजा क्व जपो होमः क्व च लिङ्गपरिग्रहः ॥

(३)

[4]पश्य मोहस्य माहात्म्यं स्वहृदिस्थेऽपि शङ्करे ।
लिङ्गस्थण्डिलवह्न्यप्सु वीक्षयन्ति यथा शिवम् ॥

---

१. म० म० प०, पृ० १३४
२. म० म० प०, पृ० ७१
३. म० म० प०, पृ० १११
४. म० म० प०, पृ० १२३

प्रमाणस्तुतिः

(१)

[1]धर्माधर्मव्याप्तिविनाशान्तरकाले
शक्तेः पातो गाहनिकैर्यः प्रतिपन्नः । १३२५
तं स्वेच्छातः संगिरमाणाः स्तवकाद्याः
स्वातन्त्र्यं तत्त्वव्यनपेक्षं कथयेयुः ॥

बौद्धायनसंहिता

(१)

[2]कार्यकारणभावस्तु नास्ति ज्ञाने क्षणक्षयः ।
क्षणं द्वितीयं नास्ते चेत् स्मृतिबीजं कथं भवेत् ॥
जनकं तत्कथं नष्टमनष्टं वाप्यनष्टकम् । १३३०
नष्टस्य जनकत्वं चेदभावाद् भावसन्ततिः ॥
जनकत्वे त्वनष्टस्य क्षणभङ्गः प्रहीयते ।
द्वितीयं यत्क्षणं तिष्ठेत् तदास्ते शतमप्यथ ॥
जनकत्वेऽर्थनिष्ठस्य अर्थे नाऽभावमेति तत् ।
तस्माद् भावाः स्थिराः सर्वे न च्यवन्ते स्वरूपतः ॥ १३३५
आत्मावबोधविषये स्वस्थिराः क्षणिका न ते ।
बाध्यबाधकभावोऽपि न स्यान्निश्चायकं विना ॥
शुक्तौ हि रजतज्ञानभ्रान्तिभङ्गोऽस्ति नान्यथा ।
तस्माज्ज्ञानं नित्यमेकं क्षणिकानि बहूनि नो ॥

---

१. त० आ० १३ । १२८; पृ० ८५

२. स्प० प्र०, पृ० १५

(२)

[1]शान्ते चन्द्रे त्वमात्राख्ये यावन्नोच्चरते रविः । १३४०
उदयः सर्वमन्त्राणां विलयश्च दिवौकसाम् ॥

ब्रह्मयामलम्

(१)

[2]मातृमण्डलसंबोधात् संस्कारात् तपसः प्रिये ॥
ध्यानाद्योगाञ्जपाज्ज्ञानान्मन्त्राराधनतो व्रतात् ।
संप्राप्यं कुलसामान्यं ज्ञानं कौलिकसिद्धिदम् ॥

(२)

[3]तत्रैव चोक्तं सेवायां कृतायामविकल्पतः ॥ १३४५
साधकस्य न चेत् सिद्धिः किं कार्यमिति चोदिते ।
आत्मीयमस्य संज्ञानक्रमेण स्वात्मदीक्षणम् ॥
सस्फुरत्वप्रसिद्ध्यर्थं ततः साध्यं प्रसिद्ध्यति ।
अनेन स्वात्मविज्ञानं सस्फुरत्वप्रसाधकम् ॥
उक्तं मुख्यतयाऽऽचार्यो भवेद्यदि न सस्फुरः । १३५०
तत्रैव च पुनः श्रीमद्रक्ताराधनकर्मणि ॥
विधिं प्रोक्तं सदा कुर्वन् मासेनाचार्य उच्यते ।
पक्षेण साधकोऽर्धार्धात् पुत्रकः समयी तथा ॥

(३)

[4]संशयानो न सिद्ध्यति ।

---

१. स्प० प्र०, पृ० ३२
२. त० आ० ४ । ५७-५८; पृ० ६४
३. त० आ० ४ । ६०-६४; पृ० ६७–७०
४. त० आ० वि० ४।६०; पृ० ६७

(४)

[1]जुहोति जपति प्रेद्धे सर्वत्रैवात्र चण्डिका । १३५५

(५)

[2]नदते दशधा सा तु दिव्यानन्दप्रदायिका ।
चिनीति प्रथमः शब्दश्चिश्चिनीति द्वितीयकः ॥
चीरवाकी तृतीयस्तु शङ्खशब्दश्चतुर्थकः ।
तन्त्रीघोषः पञ्चमश्च षष्ठो वंशरवस्तथा ॥
सप्तमः कांस्यतालस्तु मेघशब्दरवस्तथा । १३६०
नवमो दावनिर्घोषो दशमो दुन्दुभिस्वनः ॥
नवशब्दान् परित्यज्य दशमो मोक्षदायकः ।
अनेन विधिना येन व्याहरेद् दशधा रवम् ॥

(६)

[3]नाध्यात्मेन विना बाह्यं नाध्यात्मं बाह्यवर्जितम् ।
सिद्ध्येज्ज्ञानक्रियाभ्यां तद् द्वितीयं संप्रकाशते ॥ १३६५
श्रीब्रह्मयामले देव इति तेन न्यरूपयत् ।

(७)

[4]श्रीब्रह्मयामले चोक्तं संक्षिप्तेऽपि हि भावयेत् ।
व्याप्तिं सर्वाध्वसामान्यां किन्तु यागे न विस्तरः ॥

(८)

[5]नित्याद्यल्पाल्पकं कुर्याद्यदुक्तं ब्रह्मयामले ॥
चीर्णविद्याव्रतः सर्वं मनसा वा स्मरेत् प्रिये । १३७०

---

१. त० आ० वि० ४ । ६५; पृ० ७१
२. त० आ० वि० ५ । ९९; पृ० ४१०
३. त० आ० १५ । ४३-४४; पृ० २७
४. त० आ० १८ । ९; पृ० १८०
५. त० आ० २३ । ४३-४४; पृ० २७९

(९)

[1]श्रीब्रह्मयामलेऽप्युक्तं पात्रं गोमुखमुत्तमम् ।
गजकूर्मतलं कुम्भवृत्तशक्तिकजाकृति ॥

(१०)

[2]प्रायश्चित्तं प्रकर्तव्यमिति श्रीब्रह्मयामले ।

(११)

[3]लक्षजापं ततः कुर्यादित्युक्तं ब्रह्मयामले ॥

(१२)

[4]श्रीब्रह्मयामलेऽप्युक्तं सुरा शिवरसो बहिः । १३७५
तां विना भुक्तिमुक्ती नो पिष्टक्षौद्रगुडैस्तु सा ॥

भर्गशिखा

(१)

[5]मृत्युं च कालं च कलाकलापं
विकारजातं प्रतिपत्तिसात्म्यम् ।
ऐकात्म्यनानात्म्यवितर्कजातं
तदा स सर्वं कवलीकरोति ॥ १३८०

(२)

[6]न सन्न चासत् सदसन्न च तन्नोभयोज्झितम् ।
दुर्विज्ञेया हि सावस्था किमप्येतदनुत्तरम् ॥

---

१. त० आ० २७ । २९; पृ० ३६८
२. त० आ० २८ । ४१९; पृ० १७८
३. त० आ० २८ । ४२३; पृ० १८०
४. त० आ० २९ । ११; पृ० ८
५. शि० वि०, पृ० २१–२२; त० आ० वि० ४ । २५५; पृ० २८४
६. त० आ० २ । २८–२९; पृ० २२–२३

अयमित्यवभासो हि यो भावोऽवच्छिदात्मकः ।
स एव घटवल्लोके संस्तथा नैष भैरवः ॥

(३)

[1]वीरव्रतं चाभिनन्देद्यथायोगं तथाभ्यसेत् । १३८५

(४)

[2]वामाचारपरो मन्त्री ततो यागं समाचरेत् ।

(५)

[3]अष्टधेत्थं वर्णिता श्रीभर्गाष्टकशिखाकुले ॥

भैरवकुलम्

(१)

[4]होत्री दीक्षा तु सिद्धान्ते तन्त्रे योजनिका स्मृता ।
त्रिके समावेशवती कुले स्तोभात्मिका मता ॥
सामरस्यमयी कौले दीक्षा पञ्चविधोदिता । १३९०
वाममार्गाभिषिक्तोऽपि दैशिकः परतत्त्ववित् ॥
संस्कार्यो भैरवे सोऽपि कुले कौले त्रिकेऽपि सः ।
यतः शिवोद्भवाः सर्वे शिवधामफलप्रदाः ॥

---

१. परा० अभि०, पृ० २३५; त० आ० वि० १२ । २०; पृ० १०३

२. त० आ० वि० १५ । २८०; पृ० १३८

३. त० आ० ३२ । ६२; पृ० ३३१

४. त० आ० वि० १३ । ३०२; पृ० १८२–८३

भैरवयामलम्

(१)

[1]शिवात्मके महामञ्चे महेशानोपबर्हिणि ।
अतिरम्यतले तत्र कशिपुश्च सदाशिवः ॥ १३९५
भूतकाश्च चतुष्पादा महेन्द्रश्च पतद्ग्रहः ।
तत्रास्ते परमेशानी महात्रिपुरसुन्दरी ॥

(२)

[2]बिन्दुस्थानं सुधासिन्धुः पञ्चयोन्यः सुरद्रुमाः ।
तत्रैव नीपश्रेणी च तन्मध्ये मणिमण्टपम् ॥
तत्र चिन्तामणिकृतं देव्या मन्दिरमुत्तमम् । १४००
शिवात्मके महामञ्चे महेशानोपबर्हणे ॥
अतिरम्यतरे तत्र कशिपुश्च सदाशिवः ।
भूतकाश्च चतुष्पादा महेन्द्रश्च पतद्ग्रहः ॥
तत्रास्ते परमेशानी महात्रिपुरसुन्दरी ।
शिवार्कमण्डलं भित्वा द्रावयन्तीन्दुमण्डलम् ॥ १४०५
तदुद्भूतामृतस्यन्दिपरमानन्दनन्दिता ।
कुलयोषित् कुलं त्यक्त्वा परं वर्षणमेत्य सा ॥

(३)

[3]अष्टोत्तरशतं वह्नेः षोडशोत्तरकं रवेः ।
षट्त्रिंशदुत्तरशतं चन्द्रस्य च विनिर्णयः ॥

---

१. सौ० ल० अरु०, पृ० ३६
२. सौ० ल० लक्ष्मी०, पृ० ६४–६५; सौ० ल० अरु०, पृ० ६७
३. सौ० ल० लक्ष्मी०, पृ० ९९

भोगमोक्षप्रदीपिका

(१)

[1]कामाख्ये विषतत्त्वे निरञ्जनाह्वे क्रमाच्च सिद्धिः स्यात् । १४१०
सूर्ये सोमे हृदयात्तयोः शमाच्चेति शास्त्रसर्वस्वम् ॥

(२)

[2]उद्यन्त्रिता बलेन तु विकासवृत्त्या स्वरूपगस्तिष्ठेत् ।
स्वयमुपसृतेन्द्रियार्थानश्नन्नानन्दभूमिगो योगी ॥
एषोच्छृङ्खलरूपा विकस्वरतरा प्रबुद्धबुद्धीनाम् ।
सिद्धाः स्थिताः सदाऽस्यां ह्यानन्दरताः परा च मुद्रैषा ॥ १४१५

(३)

[3]अथवा विभागबोधज्वलनेन विलाप्य वेद्यपीयूषम् ।
पीत्वा तृप्तो विचरेन्नीरोगो योऽचिरात् सदैकाकी ॥
यत्क्रमार्थसारं परधाराभूमिका च शक्तीनाम् ।
तदनुज्ञयाऽत्र कथितं सच्छिष्यविबोधनाय यथा ॥

मतङ्गसूत्रम्

(१)

[4]शान्त्यतीतं परं तत्त्वमविनाश्यव्यया (शिवा) त्मकम् । १४२०
येनोन्मीलितसद्भावाः (सामर्थ्यात्) पशवः शिवतां गताः ॥
सदाशिवस्य देह(व)स्य लयस्तत्त्वेऽतिनिष्कले ।
चतुर्मूर्तिमयं शुभ्रं यत् तत् सकलनिष्कलम् ॥

---

१. स्व० प्र०, पृ० ३२
२. स्व० प्र०, पृ० ४९
३. स्व० प्र०, पृ० ४९-५०
४. श० र० सं०, पृ० २३

तस्मिन् भोगः समुद्दिष्टः पत्युर्विश्वस्य सर्वदा ।
अथाऽधिकारिणः पत्युः क्रीडतः परमं पदम् ॥ १४२५
स्वतन्त्रस्यापि वक्तव्यं स्वभावोऽस्य यतः पुरा ।
तथा शिवैकरूपं च स्यान्नटे बहुरूपवत् ॥

(२)

[1]मोक्षः सप्तप्रकारोऽयं विभागेनोपवर्णितः ।
एभ्यो ह्येकः परः सूक्ष्मः कार्यकारणगोचरः ॥
अतीतः परिपूर्णश्च स्वतन्त्रः सर्वतोमुखः । १४३०
एको निरीश्वरः स्वस्थः षडन्ये सेश्वरा मताः ॥
संरुद्धशक्तयश्चान्ये स्थूलभेदाः प्रकीर्तिताः ।
यान् विमोचयति स्वापे शिवाः सद्यो भवन्ति ते ॥
संहृतौ वा समुद्भूता अणवः पतयोऽथवा ।

(३)

व्याप्यव्यापकभावात् पञ्चदश स्युः क्रमेण तत्संख्याः ॥
तिथयश्च कला नित्यास्तदात्मिकाः स्युस्तथैव तत्संख्यैः ।
वर्णैः समष्टिरेषा विद्या व्याप्नोति तानि सर्वाणि ॥
सर्गादिसमष्टिरूपः स्वांशैरेभिस्तदात्मना विततः । २२८०
सर्गेण कादिवर्णैरपि षट्त्रिंशद्भिरात्मनोऽवयवैः ॥
पुनरज्व्यञ्जनबिन्दुप्रभेदभिन्नांस्तदक्षरावयवान् ।
षट्त्रिंशत्संख्याकांस्तत्त्वमयानश्नुते हि सा माता ॥
व्यष्टिसमष्टिविभेदैश्चतुरात्मा तत्त्वबीजपीठमयी ।
चतुरन्वयात्मनाऽपि च माताष्टकमातृकामयी विद्या ॥ २२८५

(३)

[1]यदयमनुत्तरमूर्तिर्निजेच्छया निखिलमपि जगत्स्रष्टुम् ।
प्रस्पन्दे स स्पन्दः प्रथमं शिवतत्त्वमुच्यते तज्ज्ञैः ॥

---

१. यो० दी०, पृ० १२४–१२६

इच्छा सैव स्वेच्छा सन्ततसमवायिनी सती शक्तिः ।
सचराचरस्य जगतो बीजं निखिलस्य निजविलीनस्य ॥

स्वेच्छाशक्त्युद्गीर्णं जगदात्माहन्तया समाच्छाद्य । २२९०
निवसन् स एव निखिलानुग्रहनिरतः सदाशिवोऽभिहितः ॥

विश्वं स एव पश्यन्निदंतया निखिलमीश्वरो जातः ।
सा भाति शुद्धविद्या येदन्ताहन्तयोरभेदमतिः ॥

माया विभेदबुद्धिर्निजांशभूतेषु निखिलभूतेषु ।
नित्यं तस्य निरङ्कुशविभवं वेलेव वारिधिं रुन्धे ॥ २२९५

स तया परिमितमूर्त्तिः संकुचितसमस्तशक्तिरेष पुमान् ।
रविरिव सन्ध्यारक्तः संहृतरश्मिः स्वभासनेऽप्यपटुः ॥

सम्पूर्णकर्तृताद्या या बह्व्यः सन्ति शक्तयस्तस्य ।
संकोचात् संकुचिता कलादिरूपेण रूपयन्त्येनम् ॥

तत्सर्वकर्तृता सा संकुचिता कतिपयार्थमात्रपरा । २३००
किञ्चित्कर्तारमसुं कलयन्ती कीर्त्यते कलानाम्ना ॥

सर्वज्ञताऽस्य शक्तिः परिमिततनुरल्पवेद्यमात्रपरा ।
ज्ञानमुपपादयन्ती विद्येति निगद्यते बुधैराद्यैः ॥

नित्यपरिपूर्णतृप्तिः शक्तिस्तस्यैव परिमिता तु सती ।
भोगेषु रञ्जयन्ती सततमसुं रागतत्त्वतां याता ॥ २३०५

सा नित्यताऽस्य शक्तिर्निकृष्य निधनोदयप्रदानेन ।
नियतपरिच्छेदकरी कलप्ता स्यात् कालतत्त्वरूपेण ॥

याऽस्य स्वतन्त्रताख्या शक्तिः संकोचशालिनी सैव ।
कृत्याकृत्येष्ववशं नियतमसुं नियमयन्त्यभून्नियतिः ॥

इच्छादित्रिसमष्टिशक्तिः शान्ताऽस्य संकुचद्रूपा । २३१०
संकुचितेच्छाद्यात्मकसत्त्वादिकसाम्यरूपिणी तु सती ॥

बुद्ध्यादिसामरस्यरूपा चित्तात्मिका मता प्रकृतिः ।
इच्छाऽस्य रजोरूपाऽहङ्कृतिरासीदसत्प्रतीतिकरी ॥

ज्ञानमपि सत्त्वरूपा निर्णयबोधस्य कारणं बुद्धिः ।
तस्य क्रिया तमोमयमूर्तिर्मन इत्युच्यते विकल्पकरी ॥ २३१५
वागादिपञ्चभेदैः स एव संकुचितविग्रहो देवः ।
ज्ञानक्रियोपरागप्राधान्याद् द्विविधविषयरूपोऽभूत् ॥
श्रोत्रं चक्षुः स्पर्शनजिह्वाघ्राणानि बोधकरणानि ।
वाक्पाणिपादपायूपस्थाख्याकानि कर्मकरणानि ॥
शब्दस्पर्शौ रूपं रसगन्धौ चेति भूतसूक्ष्माणि । २३२०
अयमेवातिनिकृष्टो जातो भूतात्मनाऽपि भूतेशः ॥
गगनमनिलश्च तेजः सलिलं भूमिश्च पञ्चभूतानि ।
श्रोत्रादिकरणवेद्याः शब्दाद्यास्तानि वेदकान्येषाम् ॥
वचनकरी वागासीत् पाणिः स्यात् करणभूतमादाने ।
गमनविसर्गानन्दत्रितये पादादित्रिकं करणम् ॥ २३२५
गन्धवती भूमिः स्यादापः सांसिद्धिकद्रवास्तेजः ।
उष्णस्पर्शमरूपस्पर्शो वायुरम्बरं शब्दः ॥

(४)

[1]हित्वा चतुष्कला सैव..... ।

सौभाग्यहृदयस्तोत्रम्

(१)

[2]नेत्रादिजालकोपान्ते हृत्पद्मासनलीलया ।
वारं वारं त्वया देवि रूपादिमधु सेव्यते ॥ २३३०

---

१. यो० दी०, पृ० १७१
२. म० म०, प० पृ० १३

(२)

[1]वर्णः कला पदं तत्त्वं मन्त्रो भुवनमेव च ।
इत्यध्वषट्कं देवेशि भाति त्वयि चिदात्मनि ॥

—:०:—

स्तोत्रावली

(१)

[2]यत्र यत्र मिलिता मरीचयः
तत्र तत्र विभुरेव जृम्भते ।

———

स्वच्छन्दः

(१)

[3]रसवह्निसमायोगात् ताम्रं कालिकया युतम् । २३३५
विशोधितं तु तत्त्वज्ञैर्हेमत्वं प्रतिपद्यते ॥
न भूयस्ताम्रतां याति तथात्मा तु कथञ्चन ।
गुरुणा तन्त्रविदुषा यस्माद् वै निर्मलः कृतः ॥
न भूयो मलतां याति शिवत्वं याति निर्मलः ।

(२)

[4]अन्यशास्त्ररतो यस्तु नासौ सिद्धिफलप्रदः । २३४०

---

१. म० म०, प० पृ० ७३
२. यो० दी०, पृ० २९३
३. श० र० सं०, पृ० ८०
४. त० आ० १३ । ३०७; पृ० १८४

स्वच्छन्दभैरवः

[1]तज्ज्ञानमीश्वरे दत्तमीश्वरेण शिवेच्छया ।
विद्यायामादितो दत्तं विद्येशाय च तत्त्वतः ॥
विद्येश्वरेण तद्दत्तं ज्ञानं नियमिकं क्रमात् ।
दत्तं रुद्रेभ्य एतच्च गुणतत्त्वेश्वराय च ॥
श्रीकण्ठायेश्वरेणैव दत्तं तेन ततः परम् । २३४५
श्रीकण्ठेन प्रधानादिदशरुद्रान्तिकं क्रमात् ॥
दीक्षयित्वा विधानेन दत्तं वै ज्ञानमम्बिके ।
दीक्षयित्वाऽभिषिच्याथ श्रीकण्ठेन मयाऽपि च ॥
दत्तं श्रीदक्षिणं सर्वं सर्वकामार्थसाधनम् ।

स्वच्छन्दसंग्रहः

(१)

[2]अधश्चोर्ध्वं सुषुम्नायाः सहस्रदलसंयुतम् । २३५०
रक्तं श्वेतं च साहस्रदलस्थं शक्तिभिर्युतम् ॥
ऊर्ध्वाधोमुखमीशानि कर्णिकाकेसरान्वितम् ।
शक्तिरूपं महादेवि कुलाकुलमयं शुभम् ॥
पङ्कजद्वयमीशानि स्थितं शाश्वतमव्ययम् ।
तयोर्मध्ये सुषुम्नान्तस्त्रिंशदाधारपङ्कजम् ॥ २३५५
शक्तिरूपं शिवाकारं शर्वाण्यासीन्निजालयम् ।
तेषां रूपं क्रियां चैव क्रमाद्वक्ष्येऽधुना शृणु ॥

---

१. यो० दी०, पृ० १५३
२. यो० दी०, पृ० ३८–३९

गुदमेढ्रान्तरं देवि पञ्चाङ्गुलसमुच्छ्रितम् ।
कन्दमेकाङ्गुलं मध्ये द्व्याङ्गुलविसारणम् ॥
तस्य मध्ये महायोनिस्त्रिकोणाकाररूपिणी । २३६०
सुषुम्ना योनिमध्यस्था तस्या मूले महेश्वरि ॥
अधःपद्मं सहस्रारं कर्णिकाकेसरान्वितम् ।
तैजसं रत्नसन्दीप्तं तद्दलस्थितशक्तिभिः ॥
प्रतिकिञ्जल्कसंस्थाभिः शक्तिभिः संवृतं प्रिये ।
कर्णिकामध्यतो देवि कुलदेवी च संस्थिता ॥ २३६५
तत्पद्मोर्ध्वं सुषुम्नाया मध्ये त्वेकाङ्गुलोपरि ।
पद्ममष्टदलैर्युक्तम् अष्टग्रन्थिसमन्वितम् ॥
रक्तं सुकर्णिकोपेतं रक्तकिञ्जल्कशोभितम् ।
ग्रन्थ्यग्रस्थत्रिशृङ्गं च ब्रह्माण्याद्यष्टभैरवैः ॥
अष्टपत्रस्थितं ग्रन्थिस्थितं वामादिशक्तिभिः । २३७०
तदन्यशक्तिभिश्चैव शृङ्गस्थाभिः समावृतम् ॥
तन्मध्ये कौलशक्त्या च सेवितं च स्मरेत्ततः ।
एकाङ्गुलप्रमाणोर्ध्वे षड्दलं कुलपङ्कजम् ॥

(२)

[1]आधारपङ्कजं पीतं चतुष्पत्रं सुकेसरम् ।
अधोमुखं च तन्मध्ये कुण्डली परमेश्वरि ॥ २३७५
स्वयम्भुमध्यगा चिन्त्या वरदादिभिरावृता ।
पार्थिवं पङ्कजं ह्येतत् तस्योर्ध्वं पञ्चपङ्कजम् ॥
तैजसं परमेशानि तन्मध्यस्थितशक्तयः ।
निष्कलाः परमेशानि विद्युत्पुञ्जनिभाः स्मरेत् ॥
तदूर्ध्वे कर्णिकामध्ये वह्निबिम्बं तदूर्ध्वगम् । २३८०
पूर्णपीठं च तन्मध्ये शाकिनी संस्थिता शिवे ॥

---

१. यो० दी०, पृ० ३९

(३)

[1]आधारपङ्कजस्योर्ध्वे सार्धद्व्यङ्गुलिकोपरि ।
तैजसं साष्टपत्रं च पीतकर्णिकया युतम् ॥
हृल्लेखाकर्णिकामध्ये स्थितानङ्गादिदेवता ।
एतस्माद् द्व्यङ्गुलादूर्ध्वे स्वाधिष्ठानं षडस्रकम् ॥ २३८५
आप्यश्च बन्दिनीशक्तिपूर्वाभिः शक्तिभिर्वृताम् ।
काकिनीमभिसञ्चित्य..... ॥

(४)

[2].....नाभिस्त्र्यर्धाङ्गुलोपरि ॥
तत्पद्मं मणिपूरं च दशपत्रं सुशोभनम् ।
लाकिनीमध्यगं तच्च डामर्यादिभिरावृतम् ॥ २३९०
चतुर्दशाङ्गुलादूर्ध्वे मणिपूराज्यपङ्कजात् ।
पङ्कजं राकिनीमध्यं द्वादशारमनाहतम् ॥
तत्रस्थकालरात्र्यादिशक्तिभिश्च समावृतम् ।
तत्रस्थसूर्यबिम्बं तु नादोड्यानाख्यपीठकम् ॥
तस्मादेकाङ्गुलादूर्ध्वे विशुद्धं षोडशारकम् । २३९५
मध्यगा डाकिनी बाह्यपत्रेषु परमेश्वरी ॥
अमृताद्यक्षरान्ताश्च चन्द्रबिम्बं तदूर्ध्वगम् ।
कण्ठोर्ध्वे परमेशानि लम्बिका चतुरङ्गुले ॥
तस्यामष्टदलं पद्मं रसिकादिभिरावृतम् ।
आज्ञाधारं द्विपत्राब्जं हक्षद्विदलसंयुतम् ॥ २४००
हंसवतीक्षमापार्श्वे तयोर्मध्ये तु हाकिनी ।

---

१. यो० दी०, पृ० ४०
२. यो० दी०, पृ० ४०

(५)

[1]..... बिन्द्वावरणमूर्ध्वतः ॥
सूर्यकोटिप्रतीकाशमतिदीप्तं महद्गुणम् ।
तन्मध्ये शतकोटीनां संख्यायोजनपङ्कजम् ॥
तत्कर्णिकायामासीनः शान्त्यतीशेश्वरः प्रभुः । २४०५
पञ्चवक्त्रो दशभुजो विद्युत्पुञ्जनिभाकृतिः ॥
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिरनुक्रमात् ।
परिवार्य स्थिताश्चैताः शान्त्यतीतस्य सुन्दरि ॥
वामभागे समासीना शान्त्यतीता मनोन्मनी ।
पञ्चवक्त्रधराः सर्वा दशबाह्विन्दुशेखराः ॥ २४१०
बिन्दुतत्त्वं समाख्यातं कोट्यर्बुदशतैर्वृतम् ।

(६)

[2]अर्धचन्द्रस्तदूर्ध्वे तु रोधिनी तस्य चोपरि ।
ज्योत्स्ना ज्योत्स्नावती कान्तिः सुप्रभा विमलापि च॥
अर्धचन्द्रस्थिता ह्येताः कलाः पञ्च प्रकीर्तिताः ।
रुन्धिनी रोधिनी रोद्धा ज्ञानरोधा तमोपहा ॥ २४१५
निरोधिकाः कलाः पञ्च कथितास्तव सुन्दरि ।
ब्रह्मादिपरमेशानां परमाप्तिनिरोधनात् ॥
निरोधिकेति सा प्रोक्ता तस्या भेदा वरानने ।
परसादाख्यसंप्राप्तिः..... ॥

(७)

[3]रोधिन्याख्यं यदुक्तं ते नादस्योर्ध्वसंस्थितः । २४२०
पद्मकिञ्जल्कसंकाशः कोटिसूर्यसमप्रभः ॥

---

१. यो० दी०, पृ० ४४–४५
२. यो० दी, पृ० ४५
३. यो० दी०, पृ० ४८

पुरैः परिवृतोऽसंख्यैर्मध्ये पञ्चकलावृतः ।
इन्धिका दीपिका चैव रेचिका मोचिका तथा ॥
ऊर्ध्वगा मध्यगा तासां पञ्चमी परमा कला ।
चन्द्रकोटिसमप्रख्यं तन्मध्येऽर्बुदयोजनम् ॥ २४२५
पद्ममध्ये समासीनमीश्वरं चोर्ध्वगामिनम् ।
चन्द्रायुतप्रतीकाशं पञ्चवक्त्रं त्रिलोचनम् ॥
इन्धिकाद्यैर्वृतं देवं शूलपाणिं जटाधरम् ।
तस्योत्सङ्गगतामूर्ध्वगामिनीं परमां शिवाम् ॥
ध्यायेत्..... । २४३०

(८)

[1]नाड्याधारस्तु नादान्तो भित्त्वा सर्वमिदं जगत् ।
अधःशक्त्या विनिर्भिद्य ऊर्ध्वशक्त्यवसानकः ॥
नाड्यां ब्रह्मबिले लीनस्त्वव्यक्तध्वनिलक्षणः ।
अतो ब्रह्मबिलं ज्ञेयं रुद्रकोट्यर्बुदैर्वृतम् ॥
तत्र ब्रह्मशिवो ज्ञेयः शशाङ्कशतसन्निभः । २४३५
दशबाहुस्त्रिनेत्रश्च पञ्चवक्त्रेन्दुशेखरः ॥
ब्रह्माणी त्वं परा शक्तिर्ब्रह्मणोत्सङ्गगामिनी ।
द्वारं या मोक्षमार्गस्य रोधयित्वा व्यवस्थिता ॥

(९)

[2]शक्तितत्त्वं समाख्यातं भुवनैरावृतं महत् ।
आधारं भुवनानां च प्रवक्ष्यामि समासतः ॥ २४४०
सूक्ष्मा चैव सुसूक्ष्मा च तथा चैवामृता तथा ।
चतुर्दिक्षु स्थितास्तासां मध्यस्था व्यापिनी स्थिता ॥
पञ्चवक्त्रा त्रिनेत्रा च सुतेजस्का च पञ्चमी ।
शक्तितत्त्वं समाख्यातं ध्यानान्मुक्तिफलप्रदम् ॥

---

१. यो० दी०, पृ० ४९
२. यो० दी०, पृ० ४९

(१०)

[1]चिदानन्दस्वरूपा तु परा शक्तिस्तदूर्ध्वतः । २४४५
समना नाम सा शक्तिः सर्वकारणकारणा ॥
सर्वाण्डानि बिभर्तीयं शिवेन समधिष्ठिता ।
प्रत्यारूढः स भगवान् शिवः परमकारणः ॥
सृष्टिं स्थितिं च संहारं तिरोभावमनुग्रहम् ।
शिवः करोति सततं सर्वकारणकारणः ॥ २४५०
शिवः सर्वस्य कर्तेयं शक्तिः कारणमिष्यते ।

(११)

[2]या शक्तिः कारणत्वेन तदूर्ध्वे उन्मना स्मृता ।
मनः संक्रमते यत्र तेन सा उन्मना स्मृता ॥
नात्र कालकलाभावो न तत्त्वं न च देवता ।
सुनिर्वाणं परं शुद्धं रुद्रवक्त्रं तदुच्यते ॥ २४५५
शिवशक्तिरिति ख्याता निर्विकल्पा निरञ्जना ।

(१२)

[3]तत्त्वातीतं वरारोहे वाङ्मनोतीतगोचरम् ।
अनिष्कलं चासकलं नीरूपं निर्विकल्पकम् ॥
निर्द्वन्द्वं परमं तत्त्वं शिवाख्यं परमं पदम् ॥

(१३)

[4]नयित्वा तं सुषुम्णाधः कन्दमूले च मारुतम् । २४६०
इच्छाज्ञानक्रियारूपां कुण्डलीं परमेश्वरीम् ॥

---

१. यो० दी०, पृ० ५०–५१
२. यो० दी०, पृ० ५१
३. यो० दी०, पृ० ५२
४. यो० दी०, पृ० ५९

प्रसुप्तभुजगाकारां मातृकारूपिणीं शिवाम् ।
पिण्डं कुण्डलिनी शक्तिः पदं हंस प्रकीर्तितः ॥
रूपं बिन्दुरिति ख्यातं रूपातीतं च चिन्मयम् ।

(१४)

[1]शिवाभिन्ना परा शक्तिः सर्वकर्मशरीरिणी । २४६५

(१५)

[2]चितिश्चैत्यं च चैतन्यं चेतनाद्वयकर्म च ।
जीवः कला च देवेशि सूक्ष्मं पुर्यष्टकं मतम् ॥

(१६)

[3]पशवस्त्रिप्रकाराः स्युस्तेष्वेके सकला मताः ।
प्रलयाकलनामानस्तेषां केचिन्महेश्वरी ॥
विज्ञानकेवलास्त्वन्ये तेषां रूपं क्रमाच्छृणु । २४७०
अनादिमलसम्पन्नो मायाकर्मावृतो विभुः ॥
शरीरी शिवतत्त्वाज्ञो भेदैकरसिको लघुः ।
सर्वदा कर्मकर्ता च स्वकर्मफलयोजकः ॥
नित्यं विषयसंसक्तो बोध्यः शोध्यः पुमानयम् ।
मलमात्रेण सम्बद्धः पशुर्विज्ञानकेवलः ॥ २४७५
सुपक्वमलविज्ञानकेवलश्च स्वयं प्रिये ।
सुतीव्रशक्तिपातेन कुरुते तान् स केवलान् ॥
मिश्राः प्रमातृरूपाः स्युः प्रलयाकलसंज्ञकाः ।
पुर्यष्टकशरीराश्च स्वस्वकर्मवशात् प्रिये ॥
सर्वयोनिषु सम्भूय भोगार्थं स्वस्वकर्मणाम् । २४८०
भुक्त्वा भोगानि तेषां तु कर्मसाम्ये शिवः स्वयम् ॥

---

१. यो० दी०, पृ० ६४
२. यो० दी०, पृ० ६८ ९८४, ३०२
३. यो० दी०, पृ० १४१

सुपक्वमलकर्माणस्तान् केचिदनुगृह्य च ।
जलतत्त्वादितत्त्वानां मध्ये लोकेश्वरास्त्रिधा ॥

(१७)

[1]अनादिमलसंच्छन्नो मायाकर्मावृतो विभुः ।
शरीरी शिवतत्त्वाज्ञो भेदैकरसिको लघुः ॥ २४८५

(१८)

[2]पुरुषादिकमायान्तं तेजस्तत्त्वं महेश्वरि ।

(१९)

[3]विद्या चेश्वरसादाख्यौ वायुतत्त्वं समीरितम् ।
यत्सदाशिवपर्यन्तं विनाशोत्पत्तिसंयुतम् ॥

(२०)

[4]तां भित्त्वा तु वरारोहे ऊर्ध्वशक्तिं परां शिवाम् ।
शक्तितत्त्वात्मिकां देवीं प्रसुप्तभुजगाकृतिम् । २४९०
शक्तितत्त्वं समाख्यातं भुवनैराश्रितं महत् ॥

(२१)

[5]शक्तितत्त्वं समाख्यातं शिवतत्त्वं तदूर्ध्वतः ।
शक्तितत्त्वं शिवो व्योम..... ॥

---

१. यो० दी०, पृ० १४४
२. यो० दी०, पृ० १४९
३. यो० दी०, पृ० १४९
४. यो० दी०, पृ० १४९–१५०
५. यो० दी०, पृ० १५०

(२२)

[1]सर्वविद्याविदाचार्यो मोक्षधर्मपरायणः ।
गुरुवक्त्रप्रयोगेण पशुं तत्रैव योजयेत् ॥ २४९५

(२३)

[2]मलादीनामपाके तु सामान्यानुग्रहो भवेत् ।
आधिकारिकमैश्वर्यं शिवानुग्रहमात्रतः ॥
पशवस्त्रिप्रकारास्तु प्राप्नुयुः परमेश्वरि ।
ये पक्वमलकर्माणस्तान् किञ्चिदनुगृह्य च ॥
जलतत्त्वादितत्त्वानां मध्ये लोकेश्वरास्त्रिधा । २५००

(२४)

[3]एभिर्मायादिभिः षड्भिः परिपूर्णः पशुः पुमान् ।
भुङ्क्ते भोगान् यथा देवि तथा पुरुषसंज्ञकः ॥
सैव मायाऽथ भोगार्थं पशोरव्यक्तसंज्ञकम् ।
मूलप्रकृति विश्वस्य गुणत्रितयरूपकम् ॥
अभूत् तस्यां प्रकृत्यां तु गुणतत्त्वं बभूव ह । २५०५
तद्दुःखसुखमोहानां मूलं सत्त्वं रजस्तमः ॥
बुद्धिव्यापारनिचयरूपं व्यक्तगुणात्मकम् ।
विषयात्मा तु बुद्धिः स्याद् गुणास्तत्र प्रयोजकाः ॥
गुणत्रयानुसारेण त्रिधा कर्मानुसारतः ।
तया बुद्ध्या समुद्भूतोऽहङ्कारस्त्रिप्रकारकः ॥ २५१०
सर्वजीवनसंरम्भरूपेण कमलासने ।
विषयास्तस्य भेदाश्च त्रिधा कर्मानुसारतः ॥
सोऽयं तैजसवैकारिभौतिकाख्यस्वरूपतः ।

---

१. यो० दी०, पृ० १५५
२. यो० दी०, पृ० १५९
३. यो० दी०, पृ० १६५–१६७

[1]विकाराश्च स्वभेदाश्च वागादीन्द्रियसंहतौ ॥
वाचिकाद्याः स्युरेतानि तत्र तत्र नियन्तृभिः । २५१५
प्राप्नोति सात्त्विकाद्याभिरवस्थाभिरगात्मजे ॥
संकल्पकारकं चेच्छारूपं तैजसतो मनः ।
जातं वैकार्यवस्थाभिर्ज्ञानकर्मेन्द्रियाणि च ॥
भूततन्मात्रशब्दस्पर्शरूपरसगन्धकाः ।
जाता वागादीन्द्रियाणां व्यापाराः परमेश्वरि ॥ २५२०
श्रोत्रत्वक्चक्षुरसनाघ्राणान्येतानि पञ्च च ।
बुद्धीन्द्रियाणि व्यापारास्तेषामेकैकशः क्रमात् ॥
शब्दस्पर्शरूपरसगन्धानां ग्रहणं प्रिये ।
कर्मेन्द्रियाणि वाक्पाणिपादपायुरुपस्थकाः ॥
वचनादानगमनविसर्गानन्दकं क्रमात् । २५२५
कर्मेन्द्रियाणां व्यापाराः पञ्चानां परिकीर्तिताः ॥
एतानि दश बाह्यानि क्रमेणाभ्यन्तरत्रयम् ।
मनो बुद्धिरहङ्कारो ह्यन्तःकरणसंज्ञकम् ॥

(२५)

[1]सर्ववाङ्मयमूला या वर्गाष्टकसमावृता ।
विश्वोत्पत्तिक्रमान्ताष्टशक्तिप्रसृतभैरवैः ॥ २५३०
शक्तिभिश्च समायुक्ता अक्षान्ता मातृकावलिः ।

(२६)

[2]ललाटोर्ध्वे समारभ्य कपालोर्ध्वावसानकम् ।
त्र्यङ्गुलोर्ध्वे शिरोदेशे परं व्योम प्रकीर्तितम् ॥

---

१. यो० दी०, पृ० १६७
२. यो० दी०, पृ० १७३

(२७)

[1]षोडशान्तमिति ख्यातं व्योमस्थानेन्दुमण्डलम् ।
तदधःस्थानगं सूर्यबिम्बं द्वादशशक्तिकम् ॥ २५३५
द्वादशान्तमिति ख्यातं स्थितं व्योमप्रदेशकम् ।
इति तेन बिन्दुतत्त्वं चतुष्पत्राम्बुजं च तत् ॥
सूर्यबिम्बमधश्चोर्ध्वं सार्धैकाङ्गुलिदेशतः ।

(२८)

[2]धरादिमायान्तमात्मतत्त्वमन्तर्गतं स्मृतम् ।
शुद्धविद्येश्वरसदाशिवविद्याख्यतत्त्वगाः ॥ २५४०
शिवशक्तिद्वयं चैव शिवतत्त्वं प्रकीर्तितम् ।
प्रमातृमेयप्रभृतिरूपमेतत् त्रयात्मकम् ॥
एतत्तत्त्वं शिवतत्त्वं सर्वतत्त्वमयं शुभम् ।

(२९)

[3]यादिक्षान्तात्मवर्णानि कला वह्नेर्महेश्वरि ।
एताः कलाः समभ्यर्च्य स्वस्ववर्णैर्यथाविधि ॥ २५४५
स्वबीजाद्याश्चतुर्थ्यन्तनाममध्या नमोऽन्तिकाः ।
प्रोक्ता वह्निकला मन्त्रनामानि शृणु साम्प्रतम् ॥
धूम्रार्चिर्नीललक्ता च कपिला विस्फुलिङ्गिनी ।

(३०)

[4]अस्त्रप्रक्षालितं शङ्खं स्थापयित्वा तथोपरि ।
हृदयात् सूर्यबिम्बं च समावाह्य स्वमन्त्रतः ॥ २५५०

---

१. यो० दी०, पृ० २१८
२. यो० दी०, पृ० २४२
३. यो० दी०, पृ० २५५
४. यो० दी०, पृ० २५५

कादिठान्तं भादिडान्तं वर्णजातं क्रमोऽक्रमात् ।
द्वयं द्वयं प्रयोक्तव्यं कलाश्च तदनन्तरम् ॥

(३१)

[1]कादिठान्ताक्षरा देवि मूर्तिनाम्ना समीरिताः ।
तपिनी तापिनी चैव शोधनी शोषणी तथा ॥
भ्रामणी क्लेदिनी चैव वरेण्या कर्षणी तथा । २५५५
सुषुम्ना वृष्टिवाहा च ज्येष्ठा चैव हिरण्यदा ॥
एताः सौरकलाश्चैव व्युत्क्रमाद् भादिडान्तिमाः ।

(३२)

[2]एलालवङ्गकङ्कोलजातीफलसुसंयुतान् ।
सुगन्धिकुसुमैर्द्रव्यैः सह तस्मिन् जले क्षिपेत् ॥
नवयोनिं समालिख्य पूर्ववज्जलमध्यतः । २५६०
विशुद्धितः समावाह्य चन्द्रमण्डलमर्चयेत् ॥

(३३)

[3]आदिकाद्यान्तिकाः सौम्याः कलाः षोडश कीर्तिताः ।
तासां नामानि वक्ष्यामि शृणु सर्वाङ्गसुन्दरि ॥
अमृता मानदा पूषा पुष्टिः प्रीतिर्महेश्वरि ।
रेवती ह्रीमती चैव श्रीकान्तिश्च सुधा ततः ॥ २५६५
ज्योत्स्ना हैमवती चैव छाया सम्पूरिता तथा ।
रामा श्यामा कलानां च नामान्येतानि वल्लभे ॥
अमृतेशीं च तन्मध्ये भावयेच्च नवात्मना ।
लकुलेशं समुद्धृत्य भृगुं संवर्तकं तथा ॥
पिनाकिनं च खड्गीशं भुजङ्गं यावनं तथा । २५७०

---

१. यो० दी०, पृ० २५६
२. यो० दी०, पृ० २५६
३. यो० दी०, पृ० २५६-२५७

योजयित्वा क्रमेणैव कार्यकारणमस्तकम् ॥
अर्धीशं योजयेदन्ते नवात्मायं समुद्धृतः ।

(३४)

[1]स्थूलं पञ्चाशदाकारं सूक्ष्ममष्टाष्टकं स्मृतम् ।

(३५)

[2]ब्रह्मरन्ध्रे ध्रुवादूर्ध्वे कुलपद्मं महेश्वरि ।
श्वेतं सुकेशरोपेतं सहस्रारमधोमुखम् ॥ २५७५
व्यापिनी केवला शक्तिरमृतौघप्रवर्षिणी ।

(३६)

[3]आधारं स्वाधिष्ठानं च मणिपूरमनाहतम् ।
मध्यमं वज्रकण्ठं च लम्बिकां च विशुद्धिकाम् ॥
आज्ञां च नवकं विद्धि षट्चक्राणि त्रिहीनकम् ।

(३७)

[4]आदौ पादावरेण्याख्यां संयुजेन्नलरक्रमे । २५८०

(३८)

[5]आधारं हृदयं बिन्दुस्थानं च परिकीर्तितम् ।

(३९)

[6]नात्र कालकलाभावम्..... ।

---

१. यो० दी०, पृ० २८४
२. यो० दी०, पृ० २९०
३. यो० दी०, पृ० २९५
४. यो० दी०, पृ० ३०७
५. यो० दी०, पृ० ३१५
६. यो० दी०, पृ० ३३०

(४०)

[1]गुरुभक्तिश्च शान्तिश्च पूजा श्रद्धा क्षमा धृतिः ।

(४१)

[2]नित्यं सम्पूजयेद् देवीं सासनां सावृतिं क्रमात् ।

(४२)

[3]अविदित्वा कुलाचारं कुलं कौलिकदर्शनम् । २५८५

(४३)

[4]अमृता प्रथमा देवी द्वितीया कर्षिणी मता ।
इन्द्राणी तु तृतीया स्यादीशानी तु चतुर्थिका ॥
पञ्चमी स्यादुमा देवी षष्ठी चैवोर्ध्वकेशिनी ।
सप्तमी ऋद्धिदा प्रोक्ता ऋक्षा चाष्टमिका मता ॥
लूका नवमिका प्रोक्ता लृषा स्याद्दशमी मता । २५९०
एकादशी यथा चैकपादा द्वादशिका शिवे ॥
ऐश्वर्याभिरता पश्चादोङ्कारी तु त्रयोदशी ।
चतुर्दशी चौषधात्मा पञ्चाधिकदशाम्बिका ॥
षोडशी त्वक्षरा देवी प्रोक्ताः षोडश शक्तयः ।
कालरात्रिश्च खातीता गायत्री च ततः परम् ॥ २५९५
घण्टाधारी च ङार्णात्मा चण्डा छाया जयापि च ।
झङ्कारी ज्ञानरूपा च टङ्कहस्ता ततः परम् ॥
ठङ्कारी द्वादश ह्येता द्वादशारे समर्चयेत् ।
डाकिनी चैव ढङ्कारी णामिनी तामसी तथा ॥

---

१. यो० दी०, पृ० ३३३
२. यो० दी०, पृ० ३३५
३. यो० दी०, पृ० ३३७
४. यो० दी०, पृ० २०७

स्थाण्वी दाक्षायणी चैव धात्री नन्दा च पार्वति । २६००
फट्कारी दशपत्रेषु पूर्वादीशान्तिकं यजेत् ॥
बन्धिनीं भद्रकालीं च महामायां यशस्विनीम् ।
रक्तां लम्बोष्ठिकां चैव पूजयेत् क्रमशः प्रिये ॥
चतुष्पत्रे च देवेशि वरदां च श्रियं तथा ।
षण्ढां सरस्वतीं चैव पूजयेत् क्रमशः शिवे ॥ २६०५
क्षमां हासवतीं चैव पूजयेच्च द्विपत्रयोः ।
एताभिः शक्तिभिर्युक्ता ध्यातव्याश्च सुरेश्वरि ॥

स्वतन्त्रतन्त्रम्

(१)

[1]याऽथ कुण्डलिनी शक्तिर्मायाकर्मानुसारिणी ।
नादबिन्द्वादिकं कार्यं तस्या इति जगत्स्थितिः ॥

(२)

[2]तत्र कुण्डलिनी शक्तिर्मायाकर्मानुसारिणी । २६१०
भुवनाधिपतीनां च हेतुस्तद्वासिनां प्रिये ॥
तदतीतं वरारोहे परं तत्त्वं निरामयम् ।

(३)

[3]हृत्प्राणेनाहं सदाहा वह्निस्वैर्ललितेरिता ।
हसाद्ययाद्ययाद्यः स्यादादिमध्यस्तहंसया ॥
तृतीयाप्रकृतिः सैव तुर्या तैरन्त्यमायया ॥ २६१५

१. श० र० सं०, पृ० ४१
२. श० र० सं०, पृ० ४४
३. सौ० ल० सौभा०, श्लो० ३२

स्वबोधोदयमञ्जरी

(१)

[1]यद्यन्मनोहरं किञ्चिदक्षिगोचरमागतम् ।
एकाग्रं भावयेत् तावद् यावल्लीनं निरोधकृत् ॥

स्वस्वभावसंबोधनम्

(१)

[2]बन्धनं बन्धकृद् बध्यस्त्रिष्वप्येको न भिद्यते ।
स्वविकल्पकृतैर्बन्धैर्बध्यते त्वनिशं जगत् ॥

स्वात्मसंबोधः

(२)

[3]यथाऽग्निपोत्रं ज्वलनोद्धृतं स- २६२०
च्छैत्यं प्रयायाच्छनकैर्न सद्यः ।
अज्ञानपङ्केऽपि तथा निरस्ते
कालेन कैवल्यमुपैति देही ॥

---

१. स्प० प्र०, पृ० ५३
२. स्प० प्र०, पृ० ८
३. स्प० प्र०, पृ० २१

स्वायंभुवागमः

(१)

[1]यत्र शुद्धिर्न पुंसेऽस्ति सक्तिर्भोगेषु किं कृता ।

(२)

[2]अप्रमेयमनिर्देश्यमनौपम्यमनामयम् । २६२५
सूक्ष्मं सर्वगतं नित्यं ध्रुवमव्ययमीश्वरम् ॥
अप्रमेयमनन्तत्वादनिर्देश्यमलक्ष्यतः ।
अनौपम्यमसादृश्याद् विमलत्वादनामयम् ॥
सूक्ष्मं चानुपलभ्यत्वाद् व्यापकत्वाच्च सर्वगम् ।
नित्यं कारणशून्यत्वादचलत्वाच्च तद् ध्रुवम् ॥ २६३०
ओङ्कारात्मतया भाति शान्त्यतीतः परः शिवः ॥

(३)

[3]शिवं प्रणम्य परमं निधनेशमतः परम् ।
ज्ञानदीक्षे प्रवक्ष्यामि ते शृणुध्वं समाहिताः ॥

(४)

[4]अथाऽऽत्ममलमायाख्यकर्मबन्धविमुक्तये ।
व्यक्तये च शिवत्वस्य शिवाज्ज्ञानं प्रवर्तते ॥ २६३५

(५)

[5]तदेकमप्यनेकत्वं शिववक्त्राम्बुजोद्भवम् ।
परापरेण भेदेन गच्छत्यर्थप्रतिश्रयात् ॥

---

१. भो० टी०, श्लो० ३
२. श० र० सं०, पृ० २
३. श० र० सं०, पृ० २
४. श० र० सं०, पृ० ४
५. श० र० सं०, पृ० ९

(६)

[1]चिन्तामणिरिवात्राऽसौ स्थितः सर्वस्य कारणम् ।
एकमेव शिवज्ञानं विभिन्नं दशधा पुनः ॥
तथाऽष्टादशधा भिन्नं भेदान्तरविसर्पितम् । २६४०

(७)

[2]एवमाख्यमिदं कृत्यं किंकारणमुदाहृतम् ।
पशूनां देहसंयोगो भोगमोक्षाय कथ्यते ॥
तथापि सह चेत्याहुरनादिमलमोचकः ।

(८)

[3]अथाऽनादिमलः पुंसां पशुत्वं परिकीर्तितम् ।
तुषकम्बुकवद् ज्ञेयं मायावापाङ्कुरस्य तत् ॥ २६४५

(९)

[4]तथो(यो)द्वलितसामर्थ्याः सर्वस्य प्रभविष्णवः ।
अनन्तेशादिविद्येशा बभूवुः कारणेच्छया ॥
तेभ्योऽमितबलाश्चान्ये तेभ्यश्चान्ये नियोगिनः ।
भवन्ति विमलात्मानः सितासितफलप्रदाः ॥
तेभ्योऽपि साञ्जनाश्चान्ये पतीच्छानुविधायिनः । २६५०
येभ्यो निखिलमुत्पन्नं जगत् स्थावरजङ्गमम् ॥

(१०)

[5]अथात्माऽविमलो बद्धः पुनर्मुक्तश्च दीक्षया ।
विज्ञेयः स त्रिधावस्थः केवलः सकलोऽमलः ॥

---

१. श० र० सं०, पृ० १०
२. श० र० सं०, पृ० २९
३. श० र० सं०, पृ० ३६
४. श० र० सं०, पृ० ५१
५. श० र० सं०, पृ० ५८

(११)

[1]क्षीणे तस्मिन् धिया सा स्यात् परं निःश्रेयसं प्रति।

(१२)

[2]स देशिकमनुप्राप्य दीक्षाविच्छिन्नबन्धनः। २६५५
प्रयाति शिवसायुज्यं निर्मलो निरुपप्लवः॥

(१३)

[3]मायेयमाणवं कर्म चैतावदणुबन्धनम्।
एतच्चोक्तं मया सर्वं संसारात्मककाण्डजम्॥

(१४)

[4]पाशज्ञानान्न मुक्तिः स्यात् पशुज्ञानात् तथैव च।
सर्वतश्च यतो मुक्तिः पतिज्ञानेन गद्यते॥ २६६०

(१५)

[5]अस्मात् प्रविततात् बन्धात् परसंस्थानिरोधकात्।
दीक्षैव मोचयत्यूर्ध्वं शैवं धाम नयत्यपि॥

(१६)

[6]अनेन क्रमयोगेन परां केवलतां गतः।
अनाद्यशुद्धिशून्यत्वात् प्राप्नोति न भवान्तरम्॥

---

१. श० र० सं०, पृ० ६६
२. श० र० सं०, पृ० ६८
३. श० र० सं०, पृ० ७६
४. श० र० सं०, पृ० ७६
५. श० र० सं०, पृ० ७६
६. श० र० सं०, पृ० ८१

(१७)

[1]भवोद्भवपदातीतो निष्कम्पार्चिरिव स्थितः । २६६५
मुक्तो व्यक्तशिवत्वोऽसौ कृतकृत्यो यतस्ततः ॥

(१८)

[2]दग्धसंसारबीजस्य या पुंसः पश्चिमार्थतः ।
सा गतिस्तस्य विज्ञेया न देशान्तरसंस्थितिः ॥
पूर्वावस्थान्तरव्यक्तौ सत्यां लोके गतं यथा ।
प्रोच्यते पटवर्णादि वस्तु तद्वत् पुमानपि ॥ २६७०

(१९)

[3]शिवधामार्पितस्याऽस्य भोगभोक्तुर्न जातुचित् ।
भोक्तृत्वमधिकारित्वं पतिकृत्यानुकारिता ॥

हंसपारमेश्वरम्

(१)

[4]शिवो हकार इत्युक्तः सकारः शक्तिरव्यया ॥

(२)

[5]पशुभावे स्थिता मन्त्राः केवला वर्णरूपिणः ।
सौषुम्णेऽध्वन्युच्चरिताः पतित्वं प्राप्नुवन्ति ते ॥ २६७५

---

१. श० र० सं०, पृ० ८५
२. श० र० सं०, पृ० ८८
३. श० र० सं०, पृ० ८९
४. यो० दी०, पृ० १५८
५. स्प० प्र०, पृ० ३३

हंसभेदः

(१)

[1]सेव्यन्ते गुरवोऽनेके ज्ञानविज्ञानभासुराः ।
दुर्लभोऽयं गुरुर्देवि योऽहङ्कारक्षयङ्करः ॥
तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।
येनाहङ्कारनिर्मुक्तः केवलो विदितः स्वयम् ॥

(२)

[2]बुद्धिप्राणशरीराख्ये यदेतस्मिन् पुरत्रये । २६८०
अहङ्काराद् वसत्यात्मा तेनायं पुरुषः स्मृतः ॥
एतत् पुरत्रयं दग्धं येन स त्रिपुरान्तकः ।
स एव पुरुषः प्रोक्तः स्मरारिरपि स स्मृतः ॥

(३)

[3]अहं प्राणो मनश्चाहमहङ्कारोऽप्यहं मतः ।
अहं बुद्धिरहं शक्तिरहं स भगवान् शिवः ॥ २६८५
किं वा बहुप्रलापेन जगत्यस्मिंश्चराचरे ।
योऽर्थः प्रमाणोपारूढः सोऽहं सर्वात्मकः स्थितः ॥

---

१. म० म० प०, पृ० ६

२. म० म० प०, पृ० ५७

३. म० म० प०, पृ० १३९

हस्तनयः

(१)

[1]सदसद्विभेदसूते-
दलनपरा कापि सहजसंवित्तिः ।
उदिता त्वमेव भगवति २६९०
जयसि जयाद्येन रूपेण ॥

१. त० आ० वि०, ४ । १७३; पृ० २००

लुप्तागमसंग्रह-श्लोकार्धानुक्रमणी

अकारः सर्ववर्णाग्र्यः १४१
अकारश्च उकारश्च ५७
अकारादिक्षकारान्ता ५४
अकारादिविसर्गान्ताः १०५
अकारान्तः परं सूक्ष्मं ६५
अकारोकारवर्णादि १३०
अकारोकारवर्णौ च १३१
अकालकलना हेतुः ३
अकुला कलयेन्नित्या ३१
अक्रमस्तु तदा ज्ञेयः ५
अक्षहीनेऽपि सामर्थ्यं ७८
अग्निकार्याधिकारश्च ७
अग्निदग्धानि बीजानि १५६
अग्निसंज्ञस्ततश्चोर्ध्वं २८
अग्नेरष्टोत्तरशतं ४२
अघोषा सास्वरारावा ७५
अचिन्त्यं व्यापकं शान्तं १४५
अजितं सुशिवाख्यस्य १७
अजितं सुशिवात् प्राप्त १७
अज्झलाद्याश्च ये वर्णाः ६५
अज्ञस्तु बद्ध्यते येन २७
अज्ञात्वा दैशिकस्तत्त्वं २१
अज्ञात्वा लयभोगौ तु १३२
अज्ञानग्रन्थिभेदो यः १४४
अज्ञानपङ्केऽपि तथा निरस्ते १८२
अज्ञानमात्रं तु मलं ६८
अज्ञानात् शङ्कते लोकः १४७
अज्ञानाद् गच्छति ज्ञानं ७१
अज्ञानाद् बध्यते लोकः १४८
अज्ञानेन सहैकत्वं १०७
अत एव जडानामपि १३३
अत एव ये निर्विमर्शं तुर्यातीतं २८
अतथ्यां कल्पनां कृत्वा १५
अतिमार्गं च मन्त्राख्यं १२
अतिरम्यतरे तत्र ९७
अतिरम्यतरे तत्र ९७
अतिसौख्यसमावेश २६
अतीतो ह्यनुमानेन १०९
अतीतः परिपूर्णश्च ९९
अतीन्द्रियं च यद्वस्तु २०
अतीन्द्रियः सुसूक्ष्मत्वात् २२
अतो ब्रह्मबिलं ज्ञेयं १७१
अतोर्ध्वं बैन्दवं तत्त्वं १४५
अतोर्ध्वं शिवतत्त्वं स्यात् १५४
अतो विश्वात्मको नाम ८३
अतोऽस्ति बुद्धिमान् कश्चित् ७९
अतः परं हि किं नाम १२२
अतः परतरं नास्ति १४६
अत्यद्भुता तव गतिर्गगने १०३
अत्यन्तनिर्मलतया १३६
अत्यन्तविमलत्वेन ८५
अत्यन्ताच्छस्वभावत्वात् १३६
अत्र कलवर्णमध्यस्थितो हकारः १६३
अत्र तु शक्त्यर्णस्य प्राथम्यं १६२
अत्र नाथः समाचारं ११५
अत्र प्रकाशमात्रं यत्स्थिते ४८
अत्र ब्रह्मादयो लीनाः १२६
अत्राशक्तधियो यान्ति २६
अथ चर्याक्रियापादं १२९
अथ चाभिमतं सूते ८५

अथ ब्रह्म परं शुद्धं ५
अथवा द्वयमप्यस्तु ४
अथवा विभागबोधज्वलनेन ९८
अथवा शिवमन्विच्छेत् ५८
अथ हव्यमिदन्ताख्यं १०४
अथाऽऽत्ममलमायाख्य १८३
अथात्माऽविमलो बद्धः १८४
अथाऽधिकारिणः पत्युः ९९
अथाऽनादिमलः पुंसां १८४
अथाऽसर्वगतो देवो १२५
अदृश्यं नेत्रवद् ब्रह्म १५३
अदृष्टं निर्गुणं यच्च ११३
अदृष्टमण्डलोऽप्येवं ६३
अदृष्टविग्रहश्चैव ११३
अदृष्टविभवाच्छान्तात् ८५
अदेहस्यापि कर्तृत्वं ८६
अद्वैतिनामभेदात्मा ८३
अध ऊर्ध्वं दिशः सर्वाः ३९
अधमश्चपलः क्षुद्रो ७२
अधरतयापि न कलना ५२
अधः पद्मं सहस्रारं १६८
अधः शक्त्या विनिर्भिद्य १७१
अधर्मभेदा विज्ञेया १२९
अधश्चोर्ध्वं सुषुम्नाया १६७
अधिकारं प्रकुर्वन्ति ११८
अधिवसतः शिवशक्ती १६२
अधिष्ठायैना अजरा पुराणी १६०
अधोमुखं च तन्मध्ये १६८
अध्यात्ममधिभूतं च १५५
अनच्ककृतायतिप्रसृतपार्श्वनाडीद्वय ४६
अनन्तं नित्यमेकं यत् २४
अनन्तं परमं ज्योतिः ६७
अनन्ताच्चन्द्रहासं तु १८
अनन्तेशादिविद्येशाः १८४
अनन्तैतावदाकार ८२
अनया हि खचारी १११
अनयोः शासने सिद्धा १०२
अनयोः सामरस्यं यत् १४१
अनयोरेतन्मिथुनं सृष्टिः १६२
अनाख्यं शक्तिरूपं तु ३१
अनादिमति संसारे १४७
अनादिमलमुक्तत्वात् २०
अनादिमलसंच्छन्नो १७४
अनादिमलसम्पन्नः १७३
अनाद्यशुद्धिशून्यत्वात् १८५
अनायासमनारम्भ १५०
अनाश्रितादिभूम्यन्ता ८३
अनाहतं विशुद्धाख्य ४१
अनाहतत्रिभिर्भेदैः १४२
अनित्यमज्ञानरतमेतद् १
अनिर्देश्यः शिवो ह्येवं ६६
अनिष्कलं चासकलं १७२
अनुग्राह्यस्य विनये १०१
अनुत्तरं परं धाम ४९
अनुत्तरेच्छा उन्मेष ८०
अनुभावो मनोऽध्यक्षः २०
अनुभावो विकल्पोत्थः २१
अनुभूय स्वरूपं तु ६३
अनुष्टुप्छन्दसा पूर्वं १९
अनेन क्रमयोगेन १८५
अनेन विधिना येन ९४
अनेन स्वात्मविज्ञानं ९३
अनौपम्यमसादृश्याद् १८३
अन्तर्गता हि प्रकाश १२८
अन्तर्दशारवसुधा १५७
अन्तर्बहीरूपतया १२३
अन्धवन्मन्दबुद्धीनां ४८
अन्यथा निष्कलो ह्यात्मा ७०
अन्यथा बहुमुक्त्युक्तिः १

अन्यथा वा समाख्यातो ८४
अन्यशास्त्ररतो यस्तु १६६
अन्याङ्गनोपगमनेन वशीकृतस्य ६
अन्ये केचन यामलामृतसरित् ८१
अन्योन्यमप्रतीकार १३७
अन्वयानां मार्गयोगात् २२
अपरोक्षे भवत्तत्त्वे १३४
अपरः षोडशो यावत् ५७
अपेक्षते प्रेक्षितुमात्मदर्शं १३८
अप्रमेयमनन्तत्वाद् १८३
अप्रमेयमनिर्देश्यं १८३
अप्राणमस्वरं ध्यात्वा ६५
अबाधोऽसत्प्रतिपक्षो ८७
अबिन्दुमविसर्गञ्च ६६
अब्रह्मचारिणस्तस्य ११२
अभिषिक्तो भवेदेवं १२१
अभीत एव यः स्वप्ने १३४
अभूत् तस्यां प्रकृत्यां तु १७५
अमर्त्यतां मर्त्यजने करोति ७
अमाने शून्यनिर्भासे १२५
अमूर्तः स पशुर्नित्यः १५५
अमृता प्रथमा देवी १८०
अमृता मानदा पूषा १७८
अमृताद्यक्षरान्ताश्च १६९
अमृतेशीं च तन्मध्ये १७८
अम्बानाथपदाध्यासात् ८४
अम्बिकाधस्ततस्तिस्रः ५
अम्बिका बाहुरित्युक्ता ११५, १४२
अयमत्र किलाम्नायः ५७
अयमित्यवभासो हि ९६
अयमेवातिनिकृष्टः १६५
अर्धीशं योजयेदन्ते १७९
अर्चिःप्ररोहे महतः प्रमातु १३८
अर्थषट्कं च दीक्षा च १५३
अर्द्धचन्द्रो निरोधी च ५८
अर्द्धचन्द्रस्तदूर्ध्वे च १७०
अर्द्धचन्द्रस्थिता ह्येताः १७०
अलक्ष्या लक्ष्यनिर्लक्ष्या ७६
अवर्णः सर्ववर्णानां १४२
अवर्णस्थो यथा वर्णः ५३
अवश्यायः प्रबोधार्के ४४
अवश्यायः प्रबोधार्के ११२
अवान्तरश्च योगेन ११४
अविच्छिन्नं जपन्त्येनं २६
अविदित्वा कुलाचारं १८०
अविनाभावसम्बन्धं ४१
अविनाभावसम्बन्धः ४१
अविकल्पेन भावेन १४
अविधिज्ञो विधानज्ञो ६३
अविद्याकृतसंकोच १३३
अविद्याशबलस्यास्य ६६
अविनाभाविनी शम्भोः ७०
अव्यक्तलिङ्गिनं दृष्ट्वा २७
अव्यक्ताद्याः प्रकृतयः १५८
अशक्तत्वान्निष्क्रियत्वात् ५०
अशुभेभ्यश्च भावेभ्यः १५
अशुद्धं हि कथं नाम ११६
अशुद्धं नास्ति तत्किञ्चित् १२६
अशून्यं शून्यकल्पञ्च १३९
अष्टधाऽनाहतः प्रोक्तः १४२
अष्टधेत्थं वर्णितासि ९६
अष्टपत्रस्थितं ग्रन्थि १६८
अष्टारव्यपदेशोऽयं १५७
अष्टाविंशतिमर्माणि ४१
अष्टाविंशतिरश्मीनां २३
अष्टावेता यशस्विन्यः १००
अष्टाष्टचक्रं प्रविराजते १०३
अष्टोत्तरशतं वह्नेः ९७

असन्देहं स्वमात्मानं १४९
अस्तिनास्तिविभागेन १४
अस्तिनास्तिविभागेन १५
अस्तोदितद्वादशभानुभाजि ३६
अस्त्रप्रक्षालितं शङ्खं १७७
अस्मात्तु कारणाद् देवि ५३
अस्मात् प्रविततात् बन्धात् १८५
अस्य द्योतयति परं स्थितिरूपं १६३
अस्या ऊर्ध्वं निरालम्बं १४५
अस्वरविमर्शरूपौ स्वांशौ १६१
अहङ्कारः स्मृतो मन्त्रः ६५
अहङ्कारमयी भूमिः ७५
अहङ्काराद् वसत्यात्मा १८७
अहं प्राणो मनश्चाहं १८७
अहं बुद्धिरहं शक्तिः १८७
अहमिति पिशाच एष ५२
अहमित्युत्तमं तत्त्वं १२३
अहमि प्रलयं कुर्वन् ८०
अहो तत्त्वस्य माहात्म्यं २८
अहोरात्रः प्राणचारे १२७
आइत्यवर्णादित्यादि १५३
आकारवर्ग उपरि प्रतिभासतेऽस्य ६
आकाशः शब्दतन्मात्रं १०५
आकाशस्येव वान्येन ४८
आकाशे नीलिमा यद्वत् ६८
आकृष्याच्छादनमिव १४१
आक्रीडनं च बालानां ८३
आक्षेपं तं विजानीयात् ६३
आगमविपिनमयूरीं ६७
आग्नेयं यच्च तद्व्योम्नः १८
आग्नेयं व्योमसंज्ञात्तु १९
आचरेत्तु महाचार ३१
आचष्टे तदनश्वरं पदमहं ८२
आचार्यः सह शिष्यैस्तु १३३
आज्ञां च नवकं विद्धि १७९
आज्ञाधारं द्विपत्राब्जं १६९
आत्मना नादमध्ये तु १३०
आत्मस्थानं किमाख्यातं ६०
आत्मस्थाने निराधारा ६६
आत्मा चैवात्मना ज्ञात २७
आत्मावबोधविषये ९२
आत्मा वै धर्म इत्युक्त ५८
आत्मा शून्य इह ज्ञेय ९
आत्मीयमस्य संज्ञान ९३
आदर्शयोरिवान्योन्यं १४०
आदावभूद् द्विधा ज्ञानं १३
आदावस्य शिरो रौद्री १४२
आदिकाद्यान्तिकाः सौम्या १७८
आदिमान्तविहीनास्तु १३१
आदिमान्तिमगृहीतवर्ण १३७
आदिमान्त्यविहीनास्तु १५३
आदौ परा चतुर्धा स्यात् २३
आदौ पादावरेण्याख्यां १७९
आदौ यस्य शिरो रौद्री ११५
आधारपङ्कजस्योर्ध्वे १६९
आधारपङ्कजं पीतं १६८
आधारं भुवनानां च १७१
आधारं स्वाधिष्ठानञ्च १७९
आधारं हृदयं बिन्दु १७९
आधिकारिकमैश्वर्यं १७५
आध्यात्मिकं द्विधा प्रोक्तं १५५
आनन्दकृत्रिमाहारवर्जं ११२
आनन्ददिक्चरी संज्ञा ३२
आनन्दोदयलक्ष्मणोरकुशलैः ८१
आनन्दं ब्रह्म तद्देहे ११२
आन्ध्यमापद्यते नूनं ४२
आप्यञ्च बन्दिनीशक्तिः १६९
आप्ये आप्या यावदमी ११०

आभ्यो युक्तवियुक्ताभ्य ५४
आमिषं तु यथा खस्थः ५२
आरभ्य मङ्गलादीति ८४
आलयाल्ललितं प्राप्तः १९
आसां सूक्ष्मा कारणं स्यात् १५१
आहारे मैथुने सैव १११
आह्लादयेत् समन्तात्तत् ४०
आह्लादनसमूहेन ४०
इच्छाज्ञानक्रियारूपां १७२
इच्छातो जायते ज्ञाना २३
इच्छादित्रिसमष्टिशक्तिः १६४
इच्छादिशक्तित्रितयं १५७
इच्छानुग्रहकर्तृत्वात् १९
इच्छा शिरःप्रदेशस्था १४२
इच्छा सैव स्वेच्छा १६४
इच्छाऽस्य रजोरूपा १६४
इच्छैषणान्तरारूढ ८०
इच्छैव कारणं तस्य १४८
इतरेतरमार्गेण ११४
इति क्रमात् समुद्दिष्टा ७७
इति क्रमेण भिन्नाः ७७
इति तेन बिन्दुतत्त्वं १७७
इति निर्मलबोधैक १५३
इति पञ्चप्रकारोऽयं ११४
इत्थं तत्तदनल्पमोह ५१
इत्यध्वषट्कं देवेशि १६६
इत्येतन्मातृकाचन्द्रं १२१
इत्येताः कारणं ज्ञेया ५
इदन्तालक्षणं हव्यं १५७
इदमेव दक्षिणान्वयरूपं १६२
इदानीं कामतत्त्वं तु २५
इदं सर्वमसर्वं यत् ३०
इन्द्राणी तु तृतीया स्यात् १८०
इन्द्रियद्वारसंग्राह्यैः १०८
इन्द्रियात्मकमेवं च ४१
इन्द्रेशानदिशोर्मध्ये ५०
इन्धिका दीपिका चैव १७१
इन्धिकाद्यैर्वृतं देवं १७१
इयं तावन्महाशक्तिः ९९
इयं योनिः स्मृता विप्र १४०
इष्यतां कुण्डलिन्याख्यं ८८
इह नैमित्तिकी संज्ञा ६९
इह हि विद्यायां त्रिष्वपि १०
ईशत्वभावकलुषाः कति ३४
ईशाद् दीप्तं त्रिमूर्तिस्तु १७
ईशानाद् मुकुटं प्राप्तः १९
ईशः सदाशिवः शान्तः १९
ईश्वरे साधको भोगे १३२
ईश्वरः सोऽत्र मन्तव्यः ७८
उक्तं बिन्दुतया शास्त्रे ४८
उक्तं मुख्यतयाऽऽचार्यो ९३
उक्तं श्रीयोगसंचारे १११
उक्तं श्रीयोगसंचारे १११
उच्चार्यमाणा ये मन्त्राः १४५
उत्क्रान्तिर्विद्यते यस्य १२५
उत्तरोत्तरवैशिष्ट्यं १४४
उत्तानं तु करं कृत्वा २
उत्थिता तु यदा तेन ५४
उत्पतन्ति च तेनैव १६
उत्पत्तिध्वंसविरहात् १५
उत्पन्नबाह्यप्रसरां तु वीर्यं ११
उत्पन्नं शाम्भवं पश्चात् २२
उत्सृज्य लौकिकाचारं ८
उदयः सर्वमन्त्राणां ९३
उदाहृतानि मुक्तानां १२९
उदिता त्वमेव भगवति १८८
उदेति तव दारितान्धतमसः ४६
उद्यदादित्यसंकाशां १५७

उद्यन्त्रिताबलेन तु ९८
उद्योगमयमालस्यं १३९
उन्मज्जनं भावयामि ३०
उन्मना तु ततोऽतीता ५८
उन्मन्यनन्ता निखिलार्थगर्भा ३५
उपादानत्वतो हेतोः ८८
उपादानं च यत् सूक्ष्मं ७८
उपायः कथ्यतां देव ६६
उपेयमितरन्नास्ति १२४
उभयोः कृषिसाम्येऽपि ८७
उभयोर्नान्यविश्लेषं ६३
उभयोर्भावयोर्ज्ञाने ५७
उल्लङ्घ्य मायामालिन्यं १०४
उष्णस्पर्शमरूपस्पर्शः १६५
ऊर्ध्वगा मध्यगा तासां १७१
ऊर्ध्वपूर्वकुबेराप्य १३
ऊर्ध्वशून्यमधः शून्यं १२२
ऊर्ध्वाधोमुखमीशानि १६७
ऊर्ध्वाधोगमविक्षेपरहितः ६१
ऊर्ध्वं त्यक्त्वा तु प्रविशेत् ५९
ऋच्छतस्त्विति पाठाद्वा १२४
ऋजीषमानने तिष्ठति १३९
ऋतोज्वला महादीप्ता ७६
ऋषीणाञ्च समासेन ११४
एक एव परः स्वात्मा २७
एक एव शिवः शक्ति ७२
एकत्रिंशद्रश्मिपतिः २३
एकमेव शिवज्ञानं १८४
एकस्मादपि तारतम्यपदवीं ८२
एकस्य मन्त्रनाथस्य ४५
एकाकिनी चैकवीरा ७५
एकाग्रं भावयेत् तावद् १८२
एकाङ्गुलप्रमाणोर्ध्वे १६८
एकादशी यथा चैक १८०
एकाशीतिपदा देवी ९९
एका स आसीत् प्रथमा १६०
एकीभावतया सर्वं ५
एके भूजलखानिलानलकला ८१
एकैव वस्तुतः शैवी ७०
एकैवेत्थं परा शक्ति ५४
एको निरीश्वरः स्वस्थः ९९
एकं तु खमिहोद्भाव्यं ६२
एकं सृष्टिमयं बीजं २७
एकः प्रमाता चित्राभि १४३
एकः स एव जननि स्थिरबुद्धिरास्ते ३४
एतच्चतुर्दशविधं रामं ५९
एतच्चतुर्विधं मार्गं १२९
एतच्चास्मत्परमगुरुकर्तृके १०
एतच्चोक्तं मया सर्वं १८५
एतत्कामकलाव्याप्तं १४१
एतत्तत्वं शिवतत्त्वं १७७
एतत्पुरत्रयं दग्धं १८७
एतत्प्रकाशनं मातु १४१
एतन्मनसि संधाय ११६
एतस्माद् द्व्यङ्गुलादूर्ध्वं १६९
एतानि दश बाह्यानि १७६
एताभिः शक्तिभियुक्ता १८१
एतावतैव भेदोऽस्य १३६
एता हार्धकलारूपा १४२
एतां बद्ध्वा महायोगी ५५
एताः कलाः समभ्यर्च्य १७७
एताः सर्वोपचारेण ८०
एताः सौरकलाश्चैव १७८
एते जाताः सह ज्ञाने १८
एते ते वयमेवमभ्युदयिनः १३८
एतेषां स्मृतितो लोकः २३
एतैर्भूतैस्तु यद् दुःखं १५५

एभिर्मायादिभिः षड्भिः १७५
एभ्यो ह्येकः परः सूक्ष्मः ९९
एलालवङ्गकङ्कोल १७८
एवमनुत्तरशक्त्यो १६२
एवमस्यात्मनः काले १०७
एवमाख्यमिदं कृत्यं १८४
एवमाद्यैरनेकैश्च १४७
एवमेते शिवाः ख्याताः १८
एवं ज्ञात्वा प्रयत्नेन १३२
एवं त्वन्मय एवाऽहं १३४
एवं द्वितीयबीजं स्थितिरूपं १६३
एवं पर्यटते देही ५५
एवं पूर्ववता साध्यं १०९
एवं प्राथमिकं प्रोक्तं १७
एवं मध्योत्तमाद् भोगात् १००
एवं मानसमाख्यातं १५५
एवं मायात्मको बन्धः ५५
एवं विचिन्त्य मतिमान् १०
एवं वै मण्डलं प्राप्य ११८
एवं शब्दस्य निष्पत्तिः ५४
एवं संसारतो भीतं ९०
एषा तु कौलिकी विद्या ६९
एषां स्मरणमात्रेण २३
एषोच्छृङ्खलरूपा ९८
एषोऽन्यत्र त्रुटेः पातः ११७
एष्वेवान्तर्गतं वस्तु १३
ऐकात्म्यनानात्म्यवितर्कजातं ९५
ऐश्वर्याभिरता पश्चाद् १८०
ओङ्कारपञ्जरशुकीमुपनिष ६७
ओङ्कारात्मतया भाति १८३
ओड्याणपीठमध्ये कदम्ब ४७
ओमित्येषा कुलेशानी ७४
औदासीन्यप्रहाणेन ८५
औन्मुख्यमिच्छाज्ञानं च ८५
औषधस्य च सामर्थ्यात् १३०
औष्ण्यं हुताश इव शीतलिमानमिन्दौ १३८
अंशुमच्चांशुसंज्ञात् तु १७
ककारादिक्षकारान्ता वर्णाः १०५
ककारादिसकारान्तात् १५३
कण्ठाग्रेषु च गायतां
कवयतां जिह्वासु चेतस्विनां ८१
कण्ठोर्ध्वे परमेशानि १६८
कण्ठोष्ठ्यमीश्वरीतत्त्वे १५१
कथञ्चिदुपलब्धेऽपि १५०
कथयामि यथातथ्यं ५९
कथितो देवि षष्ठस्तु ११४
कथितं गोपितं तेभ्यः १५२
कथ्यते तव सुश्रोणि २५
कदाचिदीदृशं विश्वं ३
कदाचिद् भक्तियोगेन १४७
कदा द्रक्ष्यामि देवेशं ९०
कन्दमेकाङ्गुलं मध्ये १६८
कपालकुहरे जिह्वा १२४
करणं सप्तधा ख्यातं ६२
करन्ध्रचितिमध्यस्था ५६
करोति या विश्वरसान्तकां ३६
करोमि चिन्मयीं शुद्धिं ३०
कर्णान्तर्विवरे योगी ६६
कर्णिकामध्यतो देवि १६८
कर्ता हर्ता च सर्वत्र ११७
कर्तृशक्तिरणोर्नित्या ७८
कर्त्तोपलब्धा संवेत्ता ५०
कर्मणा चरणाख्येयं २४
कर्मनाशाद् मलस्यापि ८९
कर्माणि मोहमूलानि १३६
कर्मेदं त्वत्कृतमपि १३६
कर्मेन्द्रियाणां व्यापाराः १७६

कर्मेन्द्रियाणि वाक्पाणि	१७६	किञ्च रुद्राणवो येन	८८
कलाकलङ्करहिता	७६	किञ्चिञ्ज्ञस्तेन स प्रोक्तः	७९
कलानां निलयो यस्मात्	१४५	किञ्चित्कर्तारमङ्गं	१६४
कलाविद्या पराशक्तेः	४१	किन्तु बिन्दोरणूनाञ्च	८६
कलोद्वलितचैतन्यः	५५	किन्त्वेतदत्र देवेशि	११६
कल्पते सर्वदेहस्था	७४	किं पुनश्चैकतानस्तु	२८
कल्पनामात्रमेवैतत्	४	किरणाश्च सहस्रञ्च	४२
कल्पान्तहुतभुक्कल्प	१३२	किरणं देवपितृतः	१९
कल्मषक्षीणमनसा	५९	किरणं देवपितुः ख्यातं	१८
काकिनीमभिसञ्चिन्त्य	१६९	किं वा बहुप्रलापेन	१८७
कादिठान्ताक्षरा देवि	१७८	कुटिलेक्षणरेखान्त	३०
कादिठान्तभादिडान्त	१७८	कुण्डलिनीमातृकाभ्याञ्च	२२
कामकला कलयित्री	१६२	कुण्डलिन्या महीभेदे	११६
कामाख्ये विषतत्त्वे निरञ्जनाह्वे	९८	कुण्डल्याख्या तु सा ज्ञेया	६०
कामिकं प्रणवाख्यस्य	१७	कुण्डल्या मातृका जाता	२३
कामो योनिः कमला वज्रपाणि	१६०	कुण्डिकामतं घुटिकासिद्धिहेतुः	२४
काम्याश्चैव निवृत्तिस्था	१०२	कुलमूलं तु खं ज्ञेयं	६२
कारणात्मपरामृष्ट	३०	कुलयोषित् कुलं त्यक्त्वा	९७
कारणं कारणाच्छर्वः	१७	कुलालचक्रं कर्मान्ते	१५६
कारुण्ये त्वनयोर्यस्मात्	१०१	कुलाष्टककृतं पूर्वं	१११
कार्यकारणभावस्तु	९२	कृत्याकृत्येष्ववशं नियतं	१६४
कार्यानुरूपं सा रूपं	१३५	कृत्यं पञ्चविधं यस्मात्	१२९
कार्यं सृष्ट्वा समावृत्य	१०५	कृष्णाञ्जननिभैरुच्चैः	१०९
कालक्रमाक्रान्तदिनेशचक्र	३६	केवलं ज्ञेयमित्युक्तं	६४
कालरात्रिश्च खातीता	१८०	केवलं भावमात्रेण	२६
कालरूपं मरीच्याद्यं	३१	कैवल्यपदभाग् योगी	१६
कालसंज्ञात् सहस्राख्यं	१७	कोटिरर्बुदमेतेषां	४२
कालाग्निरुद्रकालीति	७५	कोणेषु पूजयेदष्टा	७६
कालाग्निरुद्रकालीति	१४९	को वा दर्शयिता शम्भो	९०
कालाग्निरुद्रो लयमेति यस्यां	३६	कौरव्यं ब्रह्मणेशस्य	१८
कालानलाद् व्योमकलावसानं	३७	कौरव्यं ब्रह्मणेशात्तु	१९
कालीं महाकालमलं ग्रसन्तीं	३७	कौलार्णवानन्दघनोर्मिरूपा	३४
कालोत्थिता महादेव	३१	क्रकारः क्रोधरूपस्तु	३३
किङ्करत्वं तु गच्छति	५६	क्रमज्ञानान्महादेवी	३३

क्रमत्रयत्वाष्ट्रमरीचिचक्र ३७
क्रमत्रयाणां यच्चक्रं ३१
क्रममुद्रयाऽन्तःस्वरूपया बहिर्मुखः ३३
क्रियाकरणसंयोगात् ११
क्रियातः कुण्डली व्यक्ता २३
क्रिया पादगता यस्य १४२
क्रियावसानिकं दृष्टं १०१
क्रियेच्छाज्ञानशक्तीनां ८०
क्रीडनार्थं विलासिन्यः १००
क्रोधहर्षविवशः परां दशां ११७
क्रोधे तु मङ्गलं कुर्यात् ३३
क्व पूजा क्व जपो होमः ९१
क्षकारः कथितो योऽसौ १४२
क्षणमात्रस्थितो योगी २८
क्षणात्मा क्षणनिष्ठानां ८३
क्षणं द्वितीयं नास्ते चेत् ९२
क्षमां हासवतीं चैव १८१
क्षिप्रमाकर्षयेद् यद्वद् ५२
क्षिप्त्वा मध्ये हाटकस्तम्भभूत ११
क्षिप्त्वोदरे तु या देवी ५४
क्षीणे तस्मिन् धिया सा स्यात् १०५
क्षीयन्ते किल तत्रैव १२३
क्षीयेत यदि तद्दीक्षा १२७
क्षुधाद्यनुभवो यत्र २१
क्षेत्रादिसंप्रवेशश्च ११५
क्षेत्री क्षेत्रज्ञो भोक्ता च १५६
क्षोभकोऽत्र महातेजाः ८९
क्षोभयेन्नात्र संदेहः २६
क्षोभितोऽनन्तनाथेन १००
खमात्मा केवलं विद्यात् ६२
खं हि यद् भैरवं ज्ञेयं ६१
गगनमनिलश्च तेजः १६५
गच्छंस्तिष्ठंस्स्वपन् जाग्रत् ५९
गजकूर्मतलं कुम्भ ९५
गणेशात्सुप्रभेदाख्यं १७
गतिमेत्यर्थभावेन ५५
गन्धवती भूमिः स्यात् १६५
गन्धः स्याद् गन्धतन्मात्रं १०५
गमनविसर्गानन्दत्रितये १६५
गमागमसुगम्यस्था ३०
गमागमसुगम्यस्था ७५
गम्यते गगने ग्रावा १३३
गर्भजन्मजराऽज्ञान १५५
गर्भाधानादितः कृत्वा १४४
गुणत्रयानुसारेण १७५
गुणादिक्षितिपर्यन्तं ८९
गुणात्मकः समुद्दिष्टो ७२
गुणेषु ज्ञानमाद्यन्ते १३४
गुणैरुपेताऽपि तु सिद्धविद्या १२
गुदमेढ्रान्तरं देवि १६८
गुप्तादितप्तकुसुम १३१
गुरवे दक्षिणां दद्यात् ७८
गुरुचक्रस्य पूजार्थं ३८
गुरुणा तन्त्रविदुषा १६६
गुरुभक्तिश्च शान्तिश्च १८०
गुरुर्यथाऽग्रतः शिष्यान् २०
गुरुवक्त्रं तदेवोक्तं १५०
गुरुवक्त्रप्रयोगेण १७५
गुरुवक्त्रात्तु लभ्येत १५२
गुरुशिष्यपदे स्थित्वा १०४
गुरोर्गुरुतरा शक्तिः ६१
गुरोर्लक्षणमेतावद् १३१
गुरोर्लक्षणमेतावद् १५३
गुर्वायत्तं क्रमज्ञानं ३३
गुल्मोऽर्शमतिसारं च १५५
गुह्याद् गुह्यतमं ज्ञानं ४१
गृहीतं न निजं रूपं ६६
गृह्यते तत्त्वभावेन २१

गोपनात् पालयन्त्येव	३१	चतुर्मूर्तिमयं शुभ्रं	९८
गोपनीयानि नामानि	३१	चतुर्विंशतिसंख्यात	१
गोलकं द्वारमित्युक्तं	६३	चतुष्कमष्टकं चेति	७७
ग्रन्थ्यग्रस्थत्रिशृङ्गं च	१६८	चतुष्कमिति संभिन्नाः	७६
ग्रसते या महाकाली	३१	चतुष्कलमयो बिन्दुः	५४
ग्रस्तो यया घस्मरसंविदं	३५	चतुष्कं च चतुष्कं च	७७
ग्रामधर्मवृत्तिरुक्त	५८	चतुष्कं पञ्चकं षट्कं	७७
ग्राह्येच्चित्स्वरूपं तु	६२	चतुष्कं पञ्चकं षट्कं	७६
ग्राह्यस्वरूपविज्ञानं	६२	चतुष्कं पञ्चकं चैव	७७
ग्राह्यं च ग्राहकं चैव	६२	चतुष्पत्रे च देवेशि	१८१
घट्गुप्तो यथा दीपः	१५६	चतुष्पीठाधिष्ठातृमहासंविदालम्बनेन	१०
घट्गुप्तो यथा भानुः	१५६	चत्वारः परतो वर्णाः	८
घण्टाधारी च ङार्णात्मा	१८०	चत्वारिंशादथ तिस्रः समिधाः	१६०
घृतकीटनयादेक	१५०	चत्वारिंशत्सप्तसंख्या	१४२
घोणार्चिः प्रविकासं तु	६३	चन्द्रकोटिसमप्रख्यं	१७१
चक्रं त्रिपुरसुन्दर्याः	४१	चन्द्रज्ञानविद्यायां षोडश	४३
चक्रं महासंहृतिरूपमुग्रं	३७	चन्द्राहासमनन्तस्थ	१८
चण्डकालीपदं चान्ते	१४९	चन्द्राग्निरविनक्षत्रै	५३
चण्डकाली शुद्धवर्णा	७४	चन्द्रायुतप्रतीकाशं	१७१
चतुरन्वयात्मनाऽपि च	१६३	चन्द्रः शक्तिर्महाशक्तिः	९
चतुरन्वयात्मिकेयं पश्यन्ती	१६२	चरते सर्वजन्तूनां	५५
चतुरस्रं च चत्वारि	४०	चरन् कपटमार्गेण	११९
चतुराननादिजननी	१६१	चित्तमये श्रीपीठे ज्योति	१६१
चतुर्णामङ्गता प्रोक्ता	७९	चितिश्चैत्यं च चैतन्यं	१७३
चतुर्थस्तु भगवता	११४	चित्स्वाभाव्यादसौ देवः	८३
चतुर्थं संप्रवक्ष्यामि	५८	चिदानन्दस्वरूपा तु	१७२
चतुर्दशाङ्गुलादूर्ध्वे	१६९	चिदुल्लासात् परा जाता	२२
चतुर्दले तु ते ज्ञेये	११०	चिद्घना युग्ममध्यस्था	३१
चतुर्दशविधे भूते	११०	चिद्रूपमात्मनो रूपं	७८
चतुर्दशारं चैतानि	४०	चिद्वायुकरणोत्थासु	४५
चतुर्दशारवसुधा	१५७	चिद्व्योम्निस्थोऽनुसन्धत्ते	१५४
चतुर्दशी चौषधात्मा	१८०	चिनीति प्रथमश्शब्दः	९४
चतुर्दिक्षु स्थितास्तासां	१७१	चिन्तामणिरिवात्राऽसौ	१८४
चतुर्भिः शिवचक्रैश्च	४०	चिन्तामणौ स्वरूपेण	८५

चिन्मयस्वात्मपरमेश्वरा १२८
चिन्मात्रं केवलं शुद्धं २६
चिन्मात्रामर्शयोगेन ६५
चलते यस्य दौर्बल्यात् ७२
चीरवाकी तृतीयस्तु ८४
चीर्णविद्याव्रतः सर्वं ९४
चेतसः स्थितिहेत्वर्थं २१
चेष्टात्मको भवेद् वायु ४३
जगच्च कर्तृसापेक्षं १२१
जगतो रञ्जनाद् राजा ८४
जगत्त्रितयनाथ तावति चिरेण ४६
जगत्प्राणोऽनिलो व्यूहः १०५
जनकत्वेऽर्थनिष्ठस्य ९२
जनकत्वे त्वनष्टस्य ९२
जनकं तत् कथं नष्टं ९२
जयति षडध्वप्रोज्झितपर १५९
जलतत्त्वादितत्त्वानां १७४
जलतत्त्वादितत्त्वानां १७५
जलं हिमं च यो वेद ५
जाता वागादीन्द्रियाणां १७६
जातिभेदाद् रूपभेदाद् १००
जातं वैकार्यवस्थाभिः १७६
जात्यायुर्भोगदं येन १२४
जायेते पुण्यपापौ तौ १
जिज्ञासारहितं स्थानं ३
जिह्वाग्रे वर्णनिष्पत्ति ५४
जीवः कला च देवेशि १७३
जुषन्ते येन तत्त्वानि ४३
जुषन्ते येन तत्त्वानि ११२
जुहोति जपति प्रेद्धे १११
जुहोति जपति प्रेद्धे ९४
जुह्वतो मम समोऽस्ति कोऽपरः ४४
ज्ञाता च ज्ञेयं च वक्ता ७३
ज्ञाता ज्ञेयं ज्ञानमिति ४८
ज्ञात्वा समरसं सर्वं १२७
ज्ञात्वैवमुच्यते ज्ञानी ७१
ज्ञानक्रियादिगर्भेच्छा ११
ज्ञानक्रिये शिवे प्रोक्ते ८६
ज्ञानक्रियोपरागप्राधान्यात् १६५
ज्ञानदीक्षे प्रवक्ष्यामि १८३
ज्ञानधर्मोपदेशेन १४७
ज्ञानपादं क्रमाच्चैव १२९
ज्ञानपीठं तु मुद्राख्यं ४३
ज्ञानभेदपदप्राप्त्या ६३
ज्ञानमपि सत्त्वरूपा १६५
ज्ञानमुपपादयन्ती विद्ये १६४
ज्ञानमूलमिदं सर्वं १३१
ज्ञानमेव विभज्यैकं १७
ज्ञानरूपस्थितस्यापि ७८
ज्ञानशक्तिर्मता सापि २२
ज्ञानशक्तिः पुनः सैव ६५
ज्ञानशक्त्या विजानाति ११३
ज्ञानस्य शक्तिः सङ्कल्पै ४७
ज्ञानातोऽभूत्क्रिया व्यक्ता २३
ज्ञानात्मता ज्ञेयनिष्ठा १४
ज्ञानादीनामुपायानां ७९
ज्ञानादृते नार्थसत्ता १४
ज्ञानादृते नार्थसत्ता ६४
ज्ञानानधिष्ठितः कायो १३३
ज्ञानी ज्ञानवतां क्रिया त्वविदुषां ३९
ज्ञाने न श्लिष्यते यस्मात् ७१
ज्ञानेन्दुकिरणैः सर्वैः ४०
ज्ञानोत्पत्तिनिमित्तं तु ६४
ज्ञानं गुरुमुखात् सम्यक् १२१
ज्ञानं चात्मेन्द्रियाश्लेषात् २१
ज्ञानं तदात्मतां यातं १४
ज्ञानं तदात्मतां यातं ६४
ज्ञानं नभ इवानन्तं ४७

ज्ञानं प्रशान्तं तव बोधवृत्ति	११	तत्क्षयात् कर्मनिर्मुक्तः	१३३
ज्ञानं मान्त्रं च मेलापं	३२	तच्च गम्यं यथैव स्यात्	११६
ज्ञानं वस्तुपरिच्छेदः	१२१	तच्च सर्वगतं सूक्ष्मं	१०
ज्ञानं शिवं परं बोधं	१४८	तच्छक्तिविषुवं प्रोक्तं	१३१
ज्ञानं सृष्टिं विजानीयात्	३१	तच्छक्तिश्चैव सादाख्या	११४
ज्ञायते वस्तु बोधज्ञ	६३	तज्जं ध्रुवेच्छोन्मेषाख्यं	१५३
ज्ञेये निक्षिप्तचित्तस्तु	७२	तज्ज्ञानमीश्वरे दत्तं	१६७
ज्ञेयः सर्वात्मनैवार्थः	२१	तत्तत्कालानुगुण्येन	८४
ज्येष्ठा रौद्री तथा वामा	५	तत्तद्रूपतया ज्ञानं	१४
ज्येष्ठा शक्तिः स्मृता	५४	तत्तद्रूपतया ज्ञानं	६४
ज्येष्ठांशो विष्णुः स्यात्	१६२	तत्तत्पृथक्त्वमायाति	८४
ज्योतिरूपा पराकारा	४१	तत् तथैव परमेशपूजने	४८
ज्योत्स्ना ज्योत्स्नावती कान्तिः	१७०	तत्त्यागो न व्रतादीनां	११५
ज्योत्स्ना हैमवती चैव	१७८	तत्पद्मोर्ध्वं सुषुम्नायाः	१६८
ज्वलनाद् धूमोद्गतिरिव	४३	तत्पद्मं मणिपूरं च	१६९
ज्वलनाद् धूमोद्गतिरिव	११२	तत्परं पुत्रि कथितं	६१
ज्वालावलीभिरमितस्य	१३८	तत्पुत्रा राजपुत्राः स्युः	८४
झङ्कारी ज्ञानरूपा च	१८०	तत्प्रभापटलव्याप्तं	१५७
ठङ्कारी द्वादश ह्येता	१८०	तत्प्रवृत्त्या प्राणयति	१३५
डकला भीषणा रौद्रा	७६	तत्र कुण्डलिनी शक्ति	१८१
डाकिनी चैव ढङ्कारी	१८०	तत्र चित्तं नियुञ्जीत	२५
तं स्वेच्छातः संगिरमाणाः	९२	तत्र चिन्तामणिकृतं	९७
ततः पीयूषकलशं	१२१	तत्र त्वं सर्वतत्त्वानां	११३
ततः शब्दात्मकत्वेन	११३	तत्र पर्वविधिं ब्रूमः	१११
ततः शुभाशुभा भावाः	१५	तत्र ब्रह्म शिवो ज्ञेयः	१७१
ततस्तु स्थितिसंहार	३२	तत्र यत्पूज्यमस्माकं	८४
तत औन्मुख्यतश्चिन्ता	११३	तत्र वाचकवाच्यात्म	८३
ततो गोमयसंल्लिप्ते	१३२	तत्र सर्वज्ञता ज्ञानं	११
ततोऽन्यापि महाभागा	९९	तत्र सुप्ता महाभागे	५३
ततो बोधरसाविष्टा	३०	तत्रस्थकालरात्र्यादि	१६९
ततो मूले उत्तरतो	६७	तत्रस्थसूर्यबिम्बं तु	१६९
ततो हि मिश्रतत्त्वं च	१	तत्रस्थं च यदा देवि	५३
तत्कर्णिकायामासीनः	१७०	तत्र स्थितिश्च वृद्धिश्च	१६
तत्क्षणाद् वोपभोगाद्वा	१०७	तत्रासौ संस्थितः पाश्यः	५५

तत्रासीनं महादेवं ८
तत्रास्ते परमेशानी ९७
तत्रैव च पुनः श्रीमद् ९३
तत्रैव चोक्तं सेवायां ९३
तत्रैव नीपश्रेणी च ९७
तत्त्वनिर्मुक्तदेहस्य ४५
तत्त्वातीतं परं तत्त्वं ४८
तत्त्वातीतं वरारोहे १७२
तत्त्वानि यत्र लीयन्ते १२३
तत्त्वे चेतः स्थिरीकार्यं ११६
तत्त्वे निश्चलचित्तस्तु ११६
तत्त्वेश्वरास्ततो जाताः १२३
तत्त्वैरेभिर्निबद्धात्मा १४५
तत्संबन्धात्ततः कश्चित् १०७
तत्सर्वकर्तृता सा १६४
तत्स्वरूपं जपः प्रोक्तः ६०
तथात्मज्ञानभैषज्याद् १३०
तथापि भूमिकातीतं ६०
तथापि सह चेत्याहु १८४
तथाप्येकः स्वयं याति ४८
तथा बिन्दुर्वरारोहे ५३
तथा भावनया योगी १६
तथा भावसमासक्तं १३६
तथा विलक्षणं ज्ञानं १३
तथा शिवैकरूपं च ९९
तथाऽष्टादशधा भिन्नं १८४
तथा हि मिथ्यैव भयं १३४
तथाहि सिद्धैरादिष्टं ६५
तथाहं कथयिष्यामि ५३
तथैव मन्त्रतन्त्राख्यं १३
तथैव मन्त्रतन्त्राख्यं १५९
तथैव सिद्धये सेयं १११
तथोद्वलितसामर्थ्याः १८४
तदङ्गभक्षणाद् देवि ५६
तदतीतं वरारोहे १८१
तदधः स्थानगं सूर्यं १७७
तदनादृत्य गाहन्ते १२४
तदनुज्ञयाऽत्र कथितं ९८
तदनुभवविरामप्रस्फुरद् १२५
तदन्तर्ये स्थिते शुद्धे ११०
तदन्यशक्तिभिश्चैव १६८
तदभावे तु देहस्य ११८
तदसारतरं चन्द्र ३९
तदा च तेषां संकल्पः ४९
तदाऽज्ञानान्धकारं च १५४
तदा तन्मध्यभावेन ५७
तदात्मतामन्तरेण ११३
तदा न तद्विषं क्षीणं २०
तदाप्यतासमापत्तिः १२४
तदा विस्मयमात्मा वै २७
तदाश्रयगुणो धर्मो ५५
तदा सा मृत्युकालीति ७४
तदा स्वेन विकारेण १००
तदा ह्यशेषविज्ञानं ७१
तदिदं स्याज्जगत्सर्वं ८५
तदुद्भूतामृतस्यन्दि ९७
तदूर्ध्वं बिन्दुतत्त्वं तु १५४
तदूर्ध्वं शक्तितत्त्वं हि १५४
तदूर्ध्वे कर्णिकामध्ये १६८
तदेकमप्यनेकत्वं १८३
तदेव सर्वमन्त्राणां १५०
तदेवं त्वत्प्रवृत्त्या त्वन् ४३
तदेवं त्वत्प्रवृत्त्या त्वन् ११२
तदैव किल मुक्तोऽसौ ११३
तद्गतस्त्वन्यविच्छिन्नः २१
तद्दुःखसुखमोहानां १७५
तद्भक्तानां स्वैरचारः १३९
तद्भट्टकल्लटेन्दुर्वसु ५७

तद्भासा रहितं किञ्चिद् ४२
तद्वच्छक्तिसमूहेन १४९
तद्वच्छास्त्रेणैव हि ७३
तद्वत्तादात्म्यमायाति ७
तद्वत् संसारदोषाणां १३०
तद्वदेव हि योगीन्द्रो ५२
तद्वद् देवि महायोगी ४०
तद्वद् विष्णोः सृष्टिः ४३
तद्वद् विष्णोः सृष्टिः ११२
तद्विकल्पेन नानात्वं ८४
तद्विवर्तः स्मृतो रश्मि २९
तद्व्याप्तिपूर्वमाक्षेप ६२
तन्त्रभेदो मया प्रोक्तः १९
तन्त्रमाध्यात्मिकं तद्वत् १५९
तन्त्रीघोषः पञ्चमश्च ९४
तन्निपाताच्च तस्येत्थं १०१
तन्मध्ये कौलशक्त्या च १६८
तन्मध्ये बैन्दवस्थानं ४१
तन्मध्ये शतकोटीनां १७०
तन्मध्ये संस्थितो ह्यात्मा ६५
तन्मनः कर्म चेत्याहुः १
तन्मयोऽन्तर्बहिश्चैव १२०
तन्मयो भगवान् देवो ८४
तन्मात्राणि पृथिव्यादेः ८९
तन्मूलस्योपचारस्य ४३
तन्मे कथय सुश्रोणि ३२
तपिनी तापिनी चैव १७८
तमच्छन्नतयार्थेषु ७८
तमाराध्य ततस्तुष्टाद् १०७
तयात्मशिवयोः सन्धिः ७०
तया बद्धान् शिवो जन्तून् १४७
तया बुद्ध्या समुद्भूतो १७५
तयाऽभिन्नोऽपि भिन्नोऽयं १३३
तया व्याप्तमिदं विश्वं ३२
तया व्याप्तमिदं विश्वं ५३
तया व्याप्तमिदं विश्वं ६५
तया हीना वरारोहे ५२
तयोः संभेदो मे दिशतु १५९
तयोर्मध्ये सुषुम्नान्तः १६७
तवाधारस्वरूपाणि ४१
तस्माच्छिवात्मिका शक्तिः ७२
तस्माच्छुद्धाध्वनश्चास्य ८८
तस्माज्ज्ञानं नित्यमेकं ९२
तस्मात् कार्यस्य कर्तृत्वं १२१
तस्मात्तदभ्यसेन्नित्यं १५०
तस्मात् त्वमेव सर्वत्र १०६
तस्मात् पूर्वापरावस्था १४३
तस्मात् शून्यं जगद् ध्यायेत् ४०
तस्मात् सदाशिवस्यायुः १२०
तस्मात् स पण्डितः शान्तः १३०
तस्मात् सर्वप्रयत्नेन ७०
तस्मात् सर्वस्य सिद्धार्थं ११२
तस्मादेकाङ्गुलादूर्ध्वे १६९
तस्माद्भावाः स्थिराः सर्वे ९२
तस्माद् यत् संविदो नाति १२६
तस्माद् विकल्पः संशुद्धाद् १३५
तस्माद्विदंस्तथा सर्वं १५३
तस्मान्नित्यमसंदिग्धं १४
तस्माल्लक्षगुणं प्रोक्तं १२०
तस्मिन् भोगः समुद्दिष्टः ९९
तस्य क्रिया तमोमयमूर्तिः १६५
तस्य तन्मयतां याति ६०
तस्य तन्मयतां याति १४८
तस्य देयमिदं ज्ञानं ५१
तस्य देवातिदेवस्य १४
तस्य बिन्दोस्तु चन्द्रार्कौ ६६
तस्य मध्ये महायोनिः १६८
तस्य यो वेत्ति तत्त्वेन ५०

तस्य स्वप्नादभिन्नस्य १३४
तस्य स्वेच्छाप्रवृत्तत्वात् १४७
तस्या औन्मुख्यवृत्त्यैव ११२
तस्याप्युपासा विज्ञान ६६
तस्या भोक्त्र्याः स्वतन्त्रायाः ९१
तस्यामष्टदलं पद्मं १६९
तस्यामेव स्थिता मन्त्राः ९९
तस्याश्च शिवशक्तेश्च ४२
तस्याहं वच्मि दिव्यौघं १०२
तस्येच्छा निर्गता शक्तिः ११३
तस्योत्सङ्गगतामूर्ध्वं १७१
तस्याः कलादिवर्गश्च ८९
तस्याः सूक्ष्मतरा बुद्धिः ८९
तां चितिं पश्य कायस्थां १२६
तां भित्त्वा तु वरारोहे १७४
तां विद्धि देवदेवेश ७४
तां विना भुक्तिमुक्ती नो ९५
तां स्वसंविदमाविश्य ८२
ता एवापररूपेण ५
तामसः स तु विक्षिप्तः ७२
तामेव च परे व्योम्नि १२७
तामेवानुप्रविश्यैव ४२
तावत् क्रमकृता संज्ञा ५
तावत्तु वैदिकं कर्म १४४
तावत् पूजाजपध्यान ९१
तावद् वै भ्रमवेगेन ५४
तावन्मात्रेण तज्जातं १०८
तासां नामानि वक्ष्यामि १७८
तिथयश्च कला नित्याः १६३
